
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

ॐ परमात्मने नमः ॥ श्रीरामाय नमः ॥ यद्बोधाज्जगदज्ञानाद्यद्विज्ञानाद्धि लीयते । तं नत्वा सच्चिदानंदं कुर्वेऽध्यात्मप्रदीपिकां ॥१॥ इह तावदात्मानंदानुभवपरिपूर्णेनैतानेकशिष्यव्रतैः परमकारुणिको भगवानष्टावक्रमुनिः सकलमुमुक्षुजनमुद्दिधीर्षुः शिष्यं प्रति मोक्षोपायमुपदिशति ॥ मुक्तिमिति ॥ तातेति सानुग्रहसंबोधने हे शिष्य त्वं मुक्तिमिच्छसि चेत्तर्हि विषवत् विषं यथात्यज्यते तद्वत् विषयान्

मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज ॥ क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥१॥

शब्दस्पर्शरूपरसगंधास्तदाश्रयं [illegible] त्यज । तत्रैव सक्तिं मा कार्षीरनर्थहेतुत्वादित्यर्थः ॥ एतेन ग्रन्थनिवृत्तिर्मोक्षोपाय उक्तः ॥ अथ परमानंदावाप्तिरूपमुक्त्युपायमाह ॥ क्षमेति ॥ क्षमा नाम सर्वसहत्वं सर्वोद्वेगत्वं तन्मात्रमयः ॥ आर्जवं नाम मनोविद्यारूपकुटिलसंबंधाभावः सोऽप्यात्मधर्मः । दया नाम निरुपाधिकाः सर्वप्राणिमात्रं तु वेधित्वं सोऽप्यात्मधर्मस्य । तोषो नाम आत्मानंदस्य [illegible] स्वरूपं । सत्यं नाम कालत्रयाबाध्यस्वरूपं तत्स्वरूपमेव एवं विधानामात्मस्वरूपाणां यथासाध्यं [illegible] शिष्यं प्रति भगवानष्टावक्रो मुनिर्मुक्त्युपदिशति ॥

ACC. NO:- ~~1746~~ M997.
Title:- अष्टावक्र
Subject:- philosophy
पत्रे 97

(1)

ननुपांचभौतिकोदेहएवात्मातथाचभूतानांतद्धर्माणांचत्यागेनमसंभावि तु॥
नहिपृथिव्यादीनांस्वभावभूतेषांधादिकानांत्यागेपित्यक्तमेतेइत्याशंक्यपृथि
व्यादिरूपस्त्वंनभवसीत्याह॥ नपृथ्वीति॥ हेशिष्यपृथिव्यादिनैसो[illegible]
शांतद्धर्मरूपस्त्वंनभवसि। तत्स्वरूपंतन्मात्रधर्मान्विषयांस्त्यजेत्यर्थः। नन्वहं
गौरःस्थूलइत्यादिप्रतीतेः पांचभौतिकोदेहएवात्माइत्यतआह। तेषामिति।
तेषांदेहादीनांसाक्षिणमेवात्मानंविद्धिसाक्षित्वेन[illegible]नत्वात्रदेहादेः॥

नपृथ्वीनजलंनाग्निर्नवायुर्द्यौर्नवाभवान्॥ तेषांसाक्षिणमात्मा
नंचिद्रूपंविद्धिमुक्तये॥२॥

साक्षीत्वात्मादेहादिभ्योभिन्नः। यथाघटद्रष्टाघटाद्भिन्नः इत्यर्थः॥
नैयायिकाभिमतमात्मानंनिराकरोति। चिद्रूपमिति॥ आत्मज्ञानस्यफलमाह।
२ मुक्तयेइति॥ आत्यंतिकीदुःखनिवृत्तिर्मुक्तिरितिनैयायिकाः। दुःखप्राग ३
त भावस्त्वपरिपालनंमुक्तिरितिप्रभाकराः। आत्मज्ञानंमुक्तिरितिवेदाः। इ
त्यादिमतानिनिराकुर्वन्नेवात्मज्ञानाज्जीवन्मुक्तिंदर्शयमाह॥ यदीति॥

(2)

अ०व०टी० २

हे शिष्य यदि त्वं देहं पृथक् कृत्वा देहादिभ्यो विविच्य चिति विश्राम्य चिदेकाग्र्ये
ण स्थास्यसि तर्हि त्वमधुनैव इदानीमेव सद्य एवमेव सुखी शान्तः परमानं
दः तत एव शान्तः संगसंकल्परहितः बन्धमुक्तश्च कर्तृत्वभोक्तृत्वसंसारानर्थरहि
तो भविष्यसीत्यर्थः ॥ ३ ॥ ननु वर्णाश्रमप्रयुक्तानि कर्माणि विहाय चिति विश्रा
न्त्यावस्थानं कथं युक्तमित्याशंक्याह त्वं वर्णाश्रमविलक्षणोऽसीत्याह ॥ न त्वमिति ॥

यदि देहं पृथक्कृत्य चिति विश्राम्य तिष्ठसि ॥ अधुनैव सुखी शान्तो
बन्धमुक्तो भविष्यसि ॥ ३ ॥ न त्वं विप्रादिको वर्णो नाश्रमी नाक्षगोचरः ॥
असंगोऽसि निराकारो विश्वसाक्षी सुखी भव ॥ ४ ॥

त्वं वर्णाश्रमविलक्षणोऽसीत्यर्थः ॥ न त्वं ब्राह्मणोऽसीत्यादि चातुर्वर्ण्यरूपवर्णवाना
सी नैव वर्णाश्रमी इत्याशंक्याह नाक्षगोचर इति ॥ अयं ब्राह्मणोऽसीत्यादिप्रत्यया
नां देहगोचरत्वेन त्वात्मगोचरत्वस्य स्पष्टं चक्षुरादीनामगोचरत्वादित्यर्थः ॥ तर्हि
कीदृशोऽहमित्याशंक्याह तं निरूपयन्नेकत्वद्विश्वान्निष्कलमनुवदन् ... असंगः सर्वो
पाधिसंगरहितः निराकारोऽविश्वसाक्षी त्वमसि ॥ ... रूपस्य त्वं वर्णा
श्रम विलक्षणो ... [illegible] ... चिति विश्राम्य सुखी शान्तः परमानन्दो भव

५ धर्माधर्मादि यो मनोधर्मा त्वकालत्रयेऽपि तेः सह तव संबंधो नास्तीत्यर्थः। न कर्तासि
किं च विहितनिषिद्धकर्मकर्तृधर्मादिद्वारा सुखदुःखभोक्तृत्वं तदपि न तव संबंधो
नास्ति शुद्धबुद्धस्वरूपत्वात् [illegible] त्वं सर्वदा मुक्त एवाज्ञानमात्रकृतं बंधस्तु खेह
नु चितिविश्रांतस्यैवाज्ञाननिवृत्त्यानंतरं मुक्तिरेवेत्यर्थः॥५॥ ननु शुद्धबुद्ध
स्वभावस्यैकरसस्य नित्यमुक्तस्यात्मनो बंधः किंनिबंधनो यस्य बंधस्य नि

ली

धर्माधर्मौ सुखं दुःखं मानसानि न ते विभो॥ न कर्तासि न भोक्तासि मुक्त
एवासि सर्वदा॥५॥ एको द्रष्टासि सर्वस्य मुक्तप्रायोऽसि सर्वदा॥ अयमे
वा हि ते बंधो द्रष्टारं पश्यसीतरं॥६॥

वृत्त्यर्थं। विवेकिनो यत्नं तं इत्याशंक्य नित्यमुक्तस्यापि त्वन्नीतिकं बंध [illegible] माह॥०॥
एक इति॥ हे शिष्य सर्वस्य द्रष्टा प्रतिशरीरमेकत्वमसि त [illegible] स्यापि फलतोऽसि सर्व
दा मुक्तप्रायोऽसि। देहाध्यासवशात्तु बंधो वर्तमानेऽपि व [illegible] त्वस्य मुक्तोऽसीत्यर्थः।
अयमिति॥ हि निश्चितं त्वयमेव ते बंधो यद्द्रष्टारं देहादिरूपं परिच्छिन्नं द्रष्टारं पश्य
सीत्यर्थः॥६॥ पूर्वं बंधहेतुरुक्तोऽहंकारो नर्थमूलं त्वं वदन्नेव नान्यवृत्तिपरमानंदप्रा
प्त्युपायमनुवदति॥ अहंकर्तेति॥०॥

5

अष्टा०
३

त्वं शिष्यः अहं कर्तेत्येवं रूपो योऽहंमानोऽहमिति अपात्मनि कर्तृत्वाभिमानस्तद्रूपो महा
न् कृष्णः सर्पः सुखदुःखविषयस्तेन दंशितः कवलीकृतोऽतः कारणात्त्वं कर्ता
ऽहमकर्त्ता ज्ञानात्माऽहमित्येवं रूपविश्वासामृतं निश्चयामृतं पीत्वाऽनुभूय सुखी भव
ज्ञात्वा परमानंदो भवेत्यर्थः॥ ७॥ ननु आत्मज्ञानामृतपानं किं द्वारा सुखसाधनं
मित्याशंक्य ज्ञानकाननदहनद्वारा ज्ञानाग्निः सुखसाधनमित्याह॥

अहं कर्तेत्यहंमानमहाकृष्णाहिदंशितः॥ नाहं कर्तेति विश्वासामृतं पीत्वा सुखी भव॥ ७॥ एको विशुद्धबोधोऽहमिति निश्चयवह्निना। प्रज्वाल्याज्ञानगहनं वीतशोकः सुखी भव॥ ८॥

एको विशुद्धबोधोऽहमिति॥ एकः सजातीयविजातीयस्वगतभेदरहितः वि
शुद्धबोधः चित्प्रकाशः चिदात्माऽहमिति निश्चयाग्निनाऽज्ञानारण्यं गहनं प्र
ज्वाल्य प्रकर्षेण दग्ध्वा मोहरागद्वेषप्रवृत्तिजन्यपापादिवीतशोको विगतदुःखः सन्
सुखी भवेत्यर्थः॥ ८॥ ननु ज्ञानेनाज्ञानदाहे सत्यपि सत्यस्य प्रपंचस्याज्ञा
नादनिवृत्ते वीतशोकः कथं स्यादित्याशंक्य प्रपंचस्य रज्जौ भुजंगवत्कल्पितत्वात् ज्ञानाद्धि

यत्र बोधे इदं विश्वं रज्जुसर्पवत्कल्पितं स्वाधिष्ठानाज्ञानेन कल्पितं भाति स बोधश्चि-
दात्मा त्वं सुखं चर यथा स्वप्नदशायामज्ञानेन कल्पितं व्याघ्रादिकं जाग्रद्बोधे विच-
र्य सुखं चरति तद्वदित्यर्थः। ननु दुःखहेतुप्रपंचनिवृत्तौ दुःखाभावमात्रं स्यान्न
तु सुखं कथं स्यादित्याशंक्य स्वभावत एव त्वं नित्यानंदानंदरूपस्त्वम्। मनुष्यलो-
कादेवलोकानंदेभ्यः परमुत्कृष्टः परमानंदस्त्वमित्यर्थः। एतस्यैवानंदस्यान्यानि भू-
तानि मात्रामुपजीवंतीति श्रुतेः॥९॥ ननु सर्वं रज्जुसर्पवत्कल्पितं स्वभावत… [illegible]

यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत्। आनंदपरमानंदः स बोधस्त्वं सु-
खं चर॥९॥ मुक्ताभिमानी मुक्तो हि बद्धो बद्धाभिमान्यपि। किंवदंतीह स-
त्येयं या मतिः सा गतिर्भवेत्॥१०॥

ननु दृष्टा आत्मा अमेलिखे नहि बंधमोक्षावात्मनः। किं निबंधनमित्याशंक्याह। मुक्ताभिमानीति।
इति निश्चितं मुक्ताभिमान्येव मुक्तः। अपि च बद्धाभिमानी बद्धः। अत्र किंवदंतीदृष्टांत…
इति किंवदंतीति। या मतिः सा गतिर्भवेदिति हि प्रसिद्धा किंवदंती नित्यबद्ध ज्ञानश्रुतिः स-
त्याः…नार्थः। तथा च यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरम्। तं तमेवैति…
… इत्यादि स्मृतिः परिगृहीता… तथा चाभिमानिक… बंध
मोक्षौ न तु वास्तवावित्यर्थः। पूर्वमुक्तोप्यपमर्थो दुर्बोधत्वात्पुनः पुनः शिष्यबोधार्थमुक्तः

अष्टा० ८

न तु जीवात्मनः पारमार्थिकावेव बंधमोक्षौ इति नाकिंकार्यं तत्राह ॥ आत्मेति ॥ आत्मा च भ्रमादहंतादात्म्याध्यासमात्रसंसारवानिव प्रतीयते न तु वस्तुतः संसारी एवं द्रष्टो मूर्त्तः। साक्षी निकर्तृरहंकारादेः साक्षी न तु कर्त्ता। विभुः विविधं भवत्यस्मादिति विभुः। सर्वव्यापकः पूर्णो व्यापकः। एकः सजातीयविजातीयस्वगतभेदरहितः। मुक्तः वस्तुतो बंधशून्यः आत्मकार्यशीलः। चित्स्वप्रकाशचैतन्यरूपः। अक्रियः चेष्टारहितः। असंगः सर्वसंबंधशून्यः। असंगो ह्ययं पुरुष इति श्रुतेः। निस्पृहः विषयाभिलाषरहितः। शांतः प्रवृत्तिनिवृत्तिहेतुरागद्वेषकामक्रोधमदरहितः। तस्माद्भ्रमेणैव संसारीत्यर्थः॥११॥

आत्मा साक्षी विभुः पूर्ण एको मुक्तश्चिदक्रियः। असंगो निस्पृहः शांतो भ्रमात्संसारवानिव॥११॥ कूटस्थं बोधमद्वैतमात्मानं परिभावय। आभासोऽहं भ्रमं मुक्त्वा भावं बाह्यमथांतरं॥१२॥

अहं परिच्छिन्नो मम देहादिकं सुखी दुःखी चाहमिति भ्रमस्यानादिपरंपराप्राप्तस्य सहजत्वाच्च न यावन्निवर्तयितुमशक्यत्वादावृत्तिरसकृदुपदेशाद्व्याससूत्राच्च पुनः पुनरद्वैतात्मभावनां विजातीयभावनानिवृत्तिपरः सन्कुर्यात् उपायमुपदिशति॥ कूटस्थमिति॥ हे शिष्य आभासोऽहं अहंकारोऽहमिति भ्रमं मुक्त्वा बाह्यं भावं मम देहादिकमिति बाह्यपदार्थविषयं भावनां मुक्त्वा अथांतरं भावं सुखी दुःखी अहमिति आंतरपदार्थविषयभावनां मुक्त्वा एकं कूटस्थमसंगं बोधस्वरूपमद्वैतमा
त्यादि

7

अनादिरयं देहाभिमानः सहजत्वेनयान निवर्त्तत इति पुनः पुनस्तया सं ज्ञानखड्गेन निवर्त्य सुखी भवेत्याह॥ देहाभिमानेति॥ हे पुत्रक शिष्य त्वं देहोऽहमित्यभिमानपाशेन चिरं बहुकालं बद्धोऽसि [illegible] तो बोधोऽहं चिद्रूपोऽस्मीति ज्ञानखड्गेन पुनः पुनस्तं पाशं निष्कृत्य नितरां छित्वा सुखी भव॥१३॥ चित्तवृत्तिनिरोधरूपः समाधिरेव केवलो बन्धनिवृत्तिहेतुरिति पातंजलमतमपाकर्तुमाह॥ निःसंगइति॥

देहाभिमानपाशेन चिरं बद्धोऽसि पुत्रक॥ बोधोऽहं ज्ञानखड्गेन तन्निष्कृत्य सुखी भव॥१४॥ निःसंगो निःक्रियोऽसि त्वं स्वप्रकाशो निरंजनः। अयमेव हि ते बंधः समाधिमनुतिष्ठसि॥१५॥

हे शिष्य त्वं वस्तुतो निःसंगः सर्वसंबंधशून्योऽसि तथा क्रियारहितोऽसि द्रष्टेत्यर्थः॥ स्वप्रकाशोऽपि निरंजन इति॥ निःक्रियस्य समाध्यानुष्ठाने [illegible] अयमेव हि निश्चितं बंधः। तथा च ज्ञानातिरिक्तोऽप्ययोगानुष्ठानमात्रं बन्धस्तव बंधत्वेनार्थः॥१५॥ तदेवमनात्मज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः। अथ परिपूर्णोऽहं त्वमसि विपरीतधियम् सारवन्तं च विनिनिवृत्तम् उपसंहरति श्लोकद्वयेन॥ त्वयेति॥

अष्टा० ५

हे शिष्य इदं विश्वं त्वया व्याप्तं कनकेन कटककुण्डलादिकं। तथा इदं विश्वं त्वयि प्रो-
तं मृद्विकारघटशरावादिकं। हे शिष्य त्वं यथार्थतः परमार्थतः शुद्धः। अविद्यातत्का-
र्य[illegible]रहितः बुद्धः स्वप्रकाशः चिद्रूपोसि। त्वं च सर्वगंधः सर्वरसो नेति नेतिवेदि-
श्रुतिवचनानुसारेण त्वं अध्यारोपापवादाभ्यां निःप्रपंचप्रपंचितमात्मतत्त्व-
स्वरूपं दृष्टं भवति। हे शिष्य परिपूर्णशुद्धबुद्धस्वरूपस्त्वं क्षुद्रचित्ततां विपरीतचि-
त्तवृत्तिं मा गमः। मा कार्षीरित्यर्थः॥१५॥

त्वया व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थतः॥ शुद्धबुद्धस्वरूपस्त्वं मा गमः
क्षुद्रचित्तताम्॥१५॥ निरपेक्षो निर्विकारो निर्भरः शीतलाशयः॥ अगाध-
बुद्धिरक्षुब्धो भव चिन्मात्रवासनः॥१६॥

[illegible]मानाः षडूर्मयः षड्भावविकारान् त्यक्त्वा जातास्त्वं तेभ्यो रहितः इत्यपे-
निरपेक्ष इति। हे शिष्य त्वं निरपेक्षः अशनपिपासादिषडूर्मिसंस्पर्शरहितः। तथा
निर्विकारः जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीति षड्भावविकाराः
षड्भावविकारास्तत्संस्पर्शरहितस्त्वमित्यर्थः। नहि [illegible]। निर्भरः चिद्घ-
नरूपः शीतलः सुखरूपः [illegible] समत्वमभिव्याप्य शीतलः [illegible] आशयः। अगाधबु-
द्धिः [illegible] अपरिच्छिन्ना बुद्धिः स्वरूपं येन [illegible] क्षुब्धः [illegible] अविद्यातत्कार्य[illegible]

(९१)

विषयान् विषवत्त्यज सत्यं पीयूषवद्भजेति मोक्षोपायः प्रथमश्लोके समुपदिष्टः पु
रन्तु विषयाणां विषतुल्यत्वे स्यात्मनः पीयूषतुल्यत्वे च हेतुर्वाक्यैस्तत्त्वरे तु वचनेनैव ८
षोडशश्लोकोपदेशमात्रे हेतुः शिष्यदात्मा च स्वाध्यस्तं विश्वं समन्ततो व्याप्यैव स्थितो मु
कुरद्रवत्स्वाध्यस्तशरीरस्थितिर्जीवापत्तिरेव परमपुरुषार्थस्तु पपत्तिमुखेन प्रकर
णार्थसंग्रहश्लोकत्रयेण। अथ संग्रहश्लोका इत्यादिना। तेषु प्रथमं साकारं शरी

अथ संग्रहश्लोकाः॥ साकारमनृतं विद्धि निराकारं
तु निश्चलं॥ एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः॥१७॥

रादिकं अनृतं मिथ्याभूतं विद्धि। अतस्तद्विषवत्त्यजेत्यर्थः॥ निराकारं आत्मत
त्त्वं निश्चलं कालत्रयावस्थायि विद्धि सर्वसाक्षित्वान्नित्यं विज्ञानमानंदं ब्रह्मेति
निश्चिनु॥ एतत्तत्त्वचिन्मात्रउपदेशेन उपदिश्यमानेन तत्त्वैव विश्रम्यावस्थाने
न न पुनर्भवस्य संसारस्य संभवः किंतु मोक्षस्य संभवः सिद्धिरित्यर्थः॥१९॥ ॥अथ
वर्णाश्रमधर्मकस्थूलशरीरात्सुखाद्युपाधिरूपधर्मकलिंगशरीराद्भिन्नत्वं परिपूर्णत्वं चैत
न्यं सदृष्टांतं निरूपयति॥ यथैवेति॥

अ०प्र०
८

यथैवादर्शप्रतिबिंबिते शरीरादौ अंतर्मध्ये परितो बाहिश्च सः आदर्शो व्याप्य वर्त्तते तथैव
त्वाध्यस्ते अस्मिन्स्थूले शरीरे अंतः परितश्च परमेश्वरश्चिदात्मा व्याप्य स्थितः तथा च य
त्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत् इत्यादि सर्वोपि प्रकरणार्थः संक्षे
पतः सूचितः ॥१९॥ आदर्शदृष्टांते परिच्छिन्नत्वादिन्यूनतापत्तिः स्यादध्यस्तशरीरांतर्व
र्त्तित्ववचनस्य भ्रमतो घटाकाशदृष्टांतेन व्याप्याध्यंतं व्यापकत्वमाह एकमिति ॥ यथा

यथैवादर्शमध्यस्थे रूपेंतः परितस्तु सः ॥ तथैवास्मिन्शरीरेंतः परि
तः परमेश्वरः ॥१९॥ एकं सर्वगतं व्योम बहिरंतर्यथा घटे ॥ नित्यं निरं
तरं ब्रह्म सर्वभूतगणे तथा ॥१८॥ इत्यष्टावक्रानुभवोपदेशः ॥

सर्वगतमेकं नित्यं व्योम घटपटादौ बहिरंतश्च वर्त्तते तथा नित्यं अविनाशी ब्रह्म
सर्वभूतगणे बहिरंतश्च निरंतरं सर्वदा वर्त्तत इत्यर्थः ॥ एष त आत्मा सर्वस्यांत
र इति श्रुतेः ॥ अतश्च बोध्योहमिति ॥ ज्ञानखड्गेन देहोहंभावपाशं निकृत्य सुखी
भवेत्यर्थः ॥१८॥ ॥ इति श्रीमद्विश्वेश्वरविरचितायां अष्टावक्रटीकायाम
नुभवोपदेशप्रकरणं समाप्तं ॥ ॥०॥

६

श्रीः

इत्थं गुरूक्तिपीयूषास्वादानुभवमात्मनः आविष्कारस्याश्चर्यशिष्यो निजगुरुं प्रति तावदीदृशाच्छ्रिद्रूपात्मानुभवोपदेशमाविष्कुर्वन्तं स्वगुरुं कृतोपकारस्थापनाय प्राचीनसंस्कारवशाद्विधिनानुवृत्त्या प्रतीतस्य मोहविडम्बनस्य स्मरणमाविष्करोति॥ अहो इति। अहं दृष्टस्याद्भुतस्यानुभवादहो इत्याश्चर्ये। अहं निरञ्जनः सर्वोपाधिविनिर्मुक्तः शान्तः सर्वविकारातीतः प्रकृतेः परो मायान्धकारस्पर्शशून्यो बोधः स्वप्रकाशचिद्रूप इत्यर्थः। गुरूपकारस्थापनाय मोहविडम्बनमनुस्मरति॥ एतावन्तमिति एतावन्तं गुरूपदेशावधि

अहो निरंजनः शान्तो बोधोऽहं प्रकृतेः परः। एतावन्तमहं कालं मोहेनैव विडंबितः॥१॥
यथा प्रकाशयाम्येको देहमेनं तथा जगत्। अतो मम जगत्सर्वमथवा न च किंचन॥२॥

कालं मोहेन देहात्माविवेकेन विडंबित एवास्मि। सांप्रतं तु श्रीगुरुप्रसादाद्बोधात्मानन्दानुभवोऽस्मीति विवक्षितार्थः॥१॥ पूर्वकालीनं मोहविडंबनमुक्त्वा सांप्रतं गुरुप्रसादान्मम देहात्मविवेकोऽस्तीति सोपपत्तिकमाह॥ यथेति। अहं यथा एक एव सन् जगत्प्रकाशयामि तथैवैनं स्थूलदेहं प्रकाशयामि। तथा च देहेनात्मा प्रकाश्यत्वाज्जगद्वदित्यर्थः। किं तर्हि जगदादिदेहात्मनोः संबंधः पारमार्थिकः। संबंधः परमार्थतस्तु न कश्चित्संबंधः यथा सुवर्णकुण्डलादेः इत्याह। अतो ममेति। अतो दृश्यत्वात्सर्वं देहमरवं जगत् मम मदीयं मय्यध्यस्तमित्यर्थः। वा अथवा परमार्थविचारे किंचन॥

अष्टा०
७

ननु लिंगदेहात्कारणदेहाच्च विवेकाभावे कथमकस्मात्तद्विज्ञात्मबोध इत्याशंक्य ततोपि विवेकजमात्मानुभवमाह। सशरीरमिति॥ अहो इत्याश्चर्ये॥ सशरीरलिंगशरीरकारणशरीरसहितं विश्वं परित्यज्य विचारेण पृथक्सत्तया निषिध्य कुतश्चित्तत्त्वज्ञस्याचार्योपदेशलब्धात्कौशलाच्चातुर्यादेव परमः आत्मा मया विलोक्यते नान्यः परमात्मालोकनोपायः इत्यर्थः॥३॥

सशरीरमहो विश्वं परित्यज्य मयाधुना॥ कुतश्चित्कौशलादेव परमात्मा विलोक्यते॥३॥ यथा न तोयतो भिन्नास्तरंगाः फेणबुद्बुदाः॥ आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतं॥४॥

सशरीरं विश्वं पृथक्सत्तया परित्यज्य तत्स्वरूपं तं निरूपयति। यथा न तोयत इति॥ यथा तरंगाः फेणबुद्बुदाश्च न तोयतो भिन्नाः स्वकुपादानत्वात् तथा आत्मविनिर्गतं आत्मतः संजातं आत्मोपादानकं विश्वं आत्मनो न भिन्नं एवं च तोयतरंगादिषु जलं यथा स्वरूपमनुगतं तथा स्वचिद्रूपोहं विश्वस्मिन्नधिष्ठानभूतो न मत्तोऽन्यद्विश्वमित्यर्थः॥४॥

७

13

सद्रूपं तां तनेरणात्मरूपतया सर्वावृतो वर्तते निरूपयति। तं तन्मात्रमिति॥ स्थूलदृष्ट्या तं
वेवेदान्तेन प्रतीयमानोऽपि परो विचारितः। विचारवीक्षितः सन्नपदेन। यथा तं तन्मात्रमा
वेन रूपितं न द्वैतं न तथा इदं स्थूलदृष्ट्या ग्रे तंवेदान्तेनापि प्रतीयमानं इदं विश्वमुक्त्या
विचारितं सत्। आत्मतन्मात्रमेव। आत्मसत्तामात्रात्मकमेव। तेनेन ततः स्वसत्तापरे
तु गतं तथा तेनापि स्वसत्तया पिधानं भूतानां विश्वं स्मिन्नैव नुगतमित्यर्थः॥५॥ आत्मनैव
सर्वव्याप्तमिति तत्र दृष्टान्तमाह॥ यथैवेति। यथैवेक्षुरसे लक्ष्णस्य शर्करा तेन

तेन तन्मात्रमेवेदं वपरोऽयं विचारितः। आत्मतन्मात्रमेवेदं तद्दृष्टं विश्वं विचारितं॥५॥
यथैवेक्षुरसे लक्ष्णा तेन व्याप्तैव शर्करा तथा मय्येकेपि विश्वं मया व्याप्तं निरन्तरं॥६॥
आत्माज्ञानाज्जगद्भाति किं पुनर्ज्ञानान्न भासते। रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद्भासते न हि॥७॥

मधुररसेन व्याप्तैव सर्वापि व्याप्तान्तरैवं मयि नित्यानन्दस्वरूपेऽकं तं प्रथ्यस्तं विश्वं मया
नित्यानन्देन निरन्तरं व्याप्तं तेन तस्माद्विश्वमानन्दात्मस्वरूपमेवेत्यर्थः॥ इदं वमसि
नातिप्रियमिन्मेवरूपतां तमेव सर्वं त्वावस्थितं तदनिश्चोऽवत्रयाविचारितार्थः॥६॥ विश्वं वे
दात्मनो नभिन्नं तर्हि केन कारणेन इदं भासते इत्याशंक्याह। आत्मज्ञानादिति॥ आत्मनः
ज्ञानात् जगद्भाति तथात्मनः अभिज्ञानस्य ज्ञानान्न भासते। अपि ज्ञानान्नाददन्यस्य भा
नं अपि ज्ञानान्न ज्ञानाद्वैते वलोके प्रसिद्धं दृष्टान्तमाह। रज्ज्वज्ञानादिति। रज्ज्वा रज्जुस्वरूपस्या
ज्ञानात् अहिः सर्पो भासते। तत्तज्ज्ञानात् रज्जुज्ञानान्न भासते॥७॥ नन्वात्मनः स्वज्ञानं सति

अष्टा० टी०
८

प्रकाशो नित्यबोधः मे मम निजं स्वाभाविकं स्वरूपं अहं ततः प्रकाशादतिरिक्तः भिन्नो ना-
स्मि। अतो मम यदा विश्वं प्रकाशतेन तदाहं भासः मदात्मप्रकाशादेव भासते स्वरूपचैतन्य-
चैतन्येन [illegible] कथमतो नास्मीति चेत् मैवं नाहं स्वरूपचैतन्यमतो विरोधिकं [illegible] सत्वेन ना-
साधकमेव [illegible] अन्यथा जडस्य सिद्धिरेव न स्यात्। किं चात्मस्वरूपप्रकाशाभावे सत्यात्मनो-
ऽप्यसत्वप्रसक्तिः जगदान्ध्यप्रसंगश्चेतस्माद्यदा विश्वं प्रकाशते तदात्मस्वरूपप्रकाशादेवे-
ति भावः॥ [illegible] प्रकाशो [illegible] आत्मनि [illegible] विश्वं भासते [illegible]
[illegible]॥ अहो इति॥

प्रकाशो मे निजं रूपं नातिरिक्तोऽस्म्यहं ततः। यदा प्रकाशते विश्वं तदाहं भास एव हि॥८॥
अहो विकल्पितं विश्वमज्ञानान्मयि भासते। मृदि कुंभो जले वीचिः कनके कटकं यथा॥
मत्तो विनिर्गतं विश्वं मय्येव लयमेष्यति। मृदि कुंभो जले वीचिः कनके कटकं यथा॥१०॥

स्वप्रकाशेऽपि मयि अज्ञानादिकल्पितं [illegible] मध्यस्थं विश्वं [illegible] भासते। अहो आश्चर्य-
मिदं यथा शुक्त्यादौ रूप्यादिकं भासते तद्वदित्यर्थः॥९॥ ननु मायाविकारित्वान्ने-
व विश्वमुत्पद्यते [illegible] लीयते [illegible] ननु चैतन्यात्मनी [illegible] कथमत आह॥
मत्तो विनिर्गतमिति। इदं विश्वं मत्तो विनिर्गतं मय्येव लयमेष्यति। [illegible] यथा मृ-
दादेः कुंभादि तद्वदित्यर्थः। न चात्र [illegible] शंकनीया। यतो वाचारंभणं [illegible] ना-
[illegible] येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति इति श्रुतेः॥१०॥

ननु ब्रह्मैव जगदुपादानकारणं। तर्हि तस्य विकारित्वात्मृदादिवद्विनाशित्वापत्तिरित्याश
ङ्क्याह। अहो अहमिति। अहो आश्चर्यरूपोऽहं यस्य मम सर्वोपादानभूतस्यापि विनाशो ना
स्ति। नचोपादानत्वे सुवर्णादिवद्विनाशित्वापत्तिः सुवर्णादिवद्विकारित्वाऽभावात्। नेत्रौ कारणं वि
वर्त्ताधिष्ठानत्वेनैवोपादानत्वस्वीकारात्। तत एवाशेषकार्योपादानत्वादविनाशित्वे स
र्वोत्कृष्टाय मह्यं नमः ब्रह्मादिदेवतावत् प्रलये विनाशशङ्कापि नास्तीत्याह। ब्रह्मादीति॥
ब्रह्मादिस्तम्बपर्यन्तं यज्जगत्तस्य नाशेऽपि तिष्ठतः। प्रलयेऽपि स्थितिमतो यस्य मे नाशो ना

अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे॥ ब्रह्मादिस्तम्बपर्यन्तं जगन्नाशेऽपि
तिष्ठतः॥११॥ अहो अहं नमो मह्यमेकोऽहं देहवानपि॥ क्वचिन्न गन्ता नागन्ता
व्याप्य विश्वमवस्थितः॥१२॥

स्तीत्यर्थः॥ सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिः॥११॥ नन्वात्मा सुखदुःखावच्छेदकदे
हत्वान्नानागन्तृतथाहंकाररूपत्वान्नदेशागमनवान्नित्याशङ्क्याह। अहो अहमिति॥
अहो आश्चर्यरूपोऽहं आश्चर्यरूपाय मह्यं नमः। आश्चर्यरूपत्वमेवाह। एकोऽहमिति॥
नाना सुखदुःखावच्छेदकदेहवानप्यहमेक एव। यथा नाना सकंपानि संपन्नावच्छेदक
जलोपाधिवानपि भानुरेक एवेत्यर्थः। क्वचिदिति विश्वं व्याप्यावस्थितः परिच्छिन्नाहंका
रविलक्षणोऽहं क्वचिदपि न गन्ता नागन्ता चेत्यर्थः॥१२॥

दा

व

अ॰टी॰
५

नन्वात्मानो निःसंगः शरीरसंसर्गितया जगद्धारकत्वादिस्याशंक्याह ॥ अहो अहमिति ।
प्रथमपदार्थः पूर्ववत् इति कारणान्मत्समो दक्षो समर्थः कार्यविधानचतुरः कोपि
नास्ति। येन हेतुना शरीरेण असंस्पृश्य धृतमपि देहेनासंस्पृश्य एव इदं सर्वं विश्वं चिरं कल्पकालं वि
श्वं स्थावरजंगमं मया धृतं ॥१२॥ नन्वसंबंधस्य न जगद्धारकत्वे संबंधस्यैवाभिस्यादेजग
द्धारकत्वादिस्याशंक्याह ॥ अहो अहमिति ॥ अहो आश्चर्यरूपायाहं नमः मह्यं नमः ॥ यस्य
मे संबंधि परमार्थतः किंचन किमपि नास्ति। परमार्थतः तेनोद्धतीयस्यैवाभावात् ॥

अहो अहं नमो मह्यं दक्षो नास्तीह मत्समः। असंस्पृश्य शरीरेण येन विश्वं चिरं धृतं ॥१३॥
अहो अहं नमो मह्यं यस्य मे नास्ति किंचन। अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरः ॥१४॥
ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवं। अज्ञानाद्भाति यत्रेदं सोऽहमस्मि निरंजनः ॥१५॥

अथवा यत्र यावत्तु वाङ्मनसगोचरं तावत्सर्वं यस्य मे मम संबंधि मिथ्यातादात्म्यसं
बंधस्तु वर्त्तते अहं इत्यादिरर्थः ॥ अतएव सर्वासंबंधित्वात्सर्वसंबंधित्वाभ्यामाश्चर्यरूपाय
मे मह्यं नम इत्यर्थः ॥१४॥ ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वात्कथं मिथ्यातादा
त्म्यसंबंधो जगदात्मनोरित्याशंक्याह ॥ ज्ञानं ज्ञेयमिति। ज्ञानं ज्ञेयं तथा ज्ञाता इत्यादिकं त्रि
तयं त्रिपुटीरूपं सर्वं वास्तवं पारमार्थिकं नास्ति यत्र मयि इदं त्रितयं अज्ञानादनिर्वचनीया
न्मायातादात्म्येनाध्यस्तं भाति अतएव वस्तुगत्याहं निरंजनः प्रपंचमलसंबंधशून्योऽस्मि

टीका
५

(81)

ननु निरंजनस्य कथं दुःखसंबाध इत्याशंक्याह द्वैतमिति। मूलत्वाविद्यासौ न तत्त्वावस्तव इत्या॥
द्वैतमूलमिति॥ अहो आश्चर्यं निरंजनस्याप्यात्मनः द्वैतमूलं दुःखं द्वैतं नाम ... दुःखा-
भासो न तत्त्वावस्थायां दुःखमित्यर्थः॥ दुःखाध्यासमहाव्याधेः किं भेषजमित्याशंक्या-
ह॥ नान्यदिति॥ एतन्मलो मायातत्कार्यातीतः सच्चिन्मात्रस्वरूपमेकोऽहं॥ एतत्स्वरूपानु-
संधानं सर्वदृश्यं जगज्जातं मृषा मिथ्या न परमार्थिकमिति बोधादन्यत्तस्य त्रिविधदुः-
खव्याधेर्भेषजं नास्तीत्यर्थः॥१६॥

द्वैतमूलमहो दुःखं नान्यत्तस्यास्ति भेषजं॥ दृश्यमेतन्मृषा सर्वमेकोऽहं चिद्रसोऽमलः॥१६॥
बोधमात्रोऽहमज्ञानादुपाधिः कल्पितो मया॥ एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम॥१७॥

नन्वयं द्वैतप्रपंचाध्यासः किंनिमित्तः किमुपादानक इत्याशंक्याह॥ बोधेति। बोध-
मात्रश्चिदेकस्वरूपोऽहमेव परमार्थिकः मया सर्वोपादानभूतेनैकतत्त्वाज्ञानाद्दुःखं दु-
ताननरूपान्निमित्तादहंकारप्रमुखोपाधिद्वैतप्रपंचकल्पितः। एवं विचारस्य फलमाह
एवमिति॥ एवं नित्यं विमृशतो विचारयतो मम निर्विकल्पे निरस्तद्वैते स्वरूपे चैतन्ये स्थि-
तिः प्राप्तिर्जाता॥१७॥ ननु स्वरूपे चैतन्यप्राप्तिरूपा मुक्तिः प्रागुक्तविचारजन्या चेत्तदा मु-
क्तेर्विनाशापत्तिः जन्यभावस्य विनाशित्वनियमात् विचाराज्ज — — चेत्तदा विचाररहितानां
मपि मोक्षापत्तिरित्याशंक्याह॥ ~~अहो~~ अहो इति

वस्तुतो मे मम बंधो नास्ति न च मोक्षोप्यस्ति नित्यचिद्रूपत्वात् । तर्हि शास्त्रस्य विचारस्य किं फल-
मित्याशंक्याह ॥ भ्रांतिनिवृत्तिरेव तस्य फलमित्याह ॥ अहो मयीति ॥ अहो आश्चर्यं मयि स्थि-
तं मयि विश्वं वस्तुतः ॥ कालत्रयेपि मयि न स्थितमिति विचारतो भ्रांतिरेव शांता न तु परमानंदा-
वाप्तिर्जनिता आत्मनः सर्वदा परमानंदरूपत्वात् । कीदृशी भ्रांतिर्निराश्रया उक्तविचारादृत्तां(?)
तस्य नष्टत्वान्निर्मूलेत्यर्थः ॥१९॥ ननु विज्ञानस्यापादानस्य सत्यत्वान्मुक्तस्यापि विश्वप्र-
दर्शनः स्यादित्याशंक्याह ॥ सशरीरमिति ॥ शरीरसहितमिदं विश्वं न किंचित्तत्त्वं नास्त्य-
स्यमिति निश्चितं ॥ नेह नानास्ति किंचनेति श्रुतेः । आत्मा च चिन्मात्रः शुद्ध तथा कस्मिन् कल्पना स्तां(?)

अहो मयि स्थितं विश्वं वस्तुतो न मयि स्थितं । न मे बंधोस्ति मोक्षो वा भ्रांतिः शांता निराश्रया ॥१९॥
सशरीरमिदं विश्वं न किंचिदिति निश्चितं । शुद्धचिन्मात्र आत्मा च तत्कस्मिन् कल्पनाधुना ॥
शरीरं स्वर्गनरकौ बंधमोक्षौ भयं तथा । कल्पनामात्रमेवैतत्किं मे कार्यं चिदात्मनः ॥२०

तस्मात्कारणादधुना अज्ञाननिवृत्तौ सत्यां कस्मिन्नधिष्ठाने विश्वकल्पना स्यात् कस्मिन्नपी-
त्यर्थः ॥१९॥ ननु सर्वस्य प्रपंचस्यावास्तवत्वे वर्णजात्याश्रमं शरीरमप्यवास्तवमेवेति शरीर-
विशेषमधिकृत्य प्रवर्तमानं विधिनिषेधशास्त्रमप्यवास्तवं स्यात् तथा च तद्बोधितस्वर्गनरक-
योरप्यवास्तवत्वात् तच्चरितदुःखं(?) नरकादिभयश्च न यं न स्यात् । किंच शास्त्रबोधितबंधमो-
क्षावपि वास्तवौ न स्यातामित्याशंक्य परिहरति ॥ शरीरमिति ॥ शरीरादिकमेतत्कल्प-
नामात्रमेव चिदात्मनः साक्षिण आनंदरूपस्य मम तैः शरीरादिभिः किमपि कार्यं साध्यं विधि

स्वर्गादिभिः किमेकार्यमिति प्रागुक्तः॥ अथ तल्लोके नापि मे कार्यं नास्तीत्याह॥ अहो जने ति॥
न द्वैतं पश्यतो मम अहो इत्याश्चर्ये जनसमूहे ऽपि अरण्यमिव संवृत्तं तस्मात्॥ अहं मिथ्या-
त्वे क्व रतिं प्रीतिं करवाणि न क्वापीत्यर्थः॥ २१॥ ननु शरीरस्याहंममतास्पदतया-
न्तु रागविषयत्वादहंकारस्यापि तेनास्पदतयानुरागविषयत्वान्न त्वत्स्पृहास्यादित्या-
शंक्याह॥ नाहमिति॥ अहं देहो न जडत्वात्। नापि मे देहः ममनिःसंगत्वात् जीवो

अहो जनसमूहेऽपि न द्वैतं पश्यतो मम॥ अरण्यमिव संवृत्तं क्व रतिं करवा-
ण्यहं॥ २१॥ नाहं देहो न मे देहो जीवो नाहमहं हि चित्॥ अयमेव हि मे बंध
आसीद्या जीविते स्पृहा॥ २२॥

ऽहंकारो नाहमकर्तृत्वात्। आत्मनः अकर्तृत्वात् कस्तर्हि त्वमित्याशंक्याह। अहं हि चिदिति॥
चित्स्वरूप एवाहमित्यर्थः। कुतस्तर्हि विवेकिनामपि जीविते स्पृहेत्याशंक्याह॥ अयमेव हीति॥
या जीविते स्पृहा अयमेव मे बंधः। प्रागासीत्। जीवनार्थं तिष्ठमान रूपवर्णनरत्नादिकमपि
कमाना जीविते बंधहेतुत्वात् इदानीं तु सच्चिदानंदानुभववशान्निर्ममता संगस्य प्राणा-
नुषंगबंधरूपे जीवितेऽपि स्पृहा नास्तीत्यर्थः॥ २२॥ अथ स्वस्य सर्वाधिष्ठानत्वं पश्यन्नाह॥
॥ अहो इति॥ ०॥

२०

अहो ह्यात्माश्चर्यं सन्निनंतमहांभोधौ मयि चित्तवाते समुत्थिते समुत्पन्ने सति विचित्रैर्नानाविधैर्भु
वनरूपैः कल्लोलैर्द्राक् समुत्थितं अस्मद्धं समुदितं उदयो न च मथा वारिधेस्तरंगाः स्वभावतो
भुवनानि वल्लते न भिन्नानीत्यर्थः ॥२३॥ आरब्रह्मस्तंबपर्यंतं जगन्मन्ववदति । मयीत्यनंतमहांभो
धौ सर्वव्यापकचित्समुद्रे मयि चित्तवाते संकल्पविकल्परूपानिलेऽस्मिन्मनोमारुते प्रशांते
सति संकल्पादिरहिते सति जीववणिजो जीवात्मलक्षणस्य वणिज्यकर्तुः अभाग्या
त् आरब्ध्रस्यान् जगत्पोतः शरीरादिनौका समूहः विनाशीलतः विनाशमवाप्नोतीत्यर्थः ॥

अहो भुवनकल्लोलैर्विचित्रैर्द्राक् समुत्थितं ॥ मय्यनंतमहांभोधौ चित्तवाते समुद्यते ॥२४॥
मय्यनंतमहांभोधौ [struck through] चित्तवाते प्रशाम्यति ॥ अभाग्याज्जीववणिजो
जगत्पोतो विनश्वरः ॥२५॥ मय्यनंतमहांभोधावाश्चर्यं जीववीचयः ॥ उद्यंति घ्नंति खेलंति
प्रविशंति स्वभावतः ॥२६॥ इति श्रीमदष्टावक्रप्रकरणे शिष्यप्रोक्तं स्वानुभवोल्लासे
पंचविंशतिकं समाप्तं ॥ ०० ॥

अथ बाधितानुवृत्त्या स्वस्मिन्सर्वजीवव्यवहारं प्रपश्यन्नाह । मयीति । आश्चर्यमिति । निर्वि
कारे मय्यनंतमहांभोधौ जीवा एव वीचयस्तरंगाः उद्यंति प्रभिद्यंते भवंतीमिथः परस्परं घ्नंति
ताडयंति विरुद्धभावाध्यासात् [illegible] खेलंति नीवमित्रभावाध्यासात् [illegible]
प्रविशंति स्वभावतः [illegible]
[illegible]
[illegible]

शिष्यानुभवपीयूषे जाते पिवरूपणावशात् । नद्विज्ञानपरिहार्थं शिष्य प्रगुरुः पुनः ॥१॥ अवि-
भव नाशिनमात्मानमित्यविनाशिनं व्यवहारस्थितौ दृष्टान्तद्विज्ञानपरिहार्थं तन्व्यवहारस्थिति मात्मादिप्या-
त्मानुभवनन्ताद्विना इति मुपदिशति । अविनाशिनमिति ॥ देशाद्यविनाशिनं त्रैकाल-
कं सत्तान्तालिनं कालतो व्यवच्छेदशून्यं आत्मानं देशतो व्यवच्छेदशून्यं एवं वस्तुतो व्यवच्छे-
दशून्यं चित्स्वरूपं विज्ञाय निदिध्यास्य तत्त्वतः आत्मतत्त्वस्य एव धीरस्य तव अर्थजा-
तं व्यवहारिकार्यग्रहे कस्यं रतिः प्रीतिर्भवेदित्याक्षेपः ॥१॥ ॥

अविनाशिनमात्मानमेकं विज्ञाय तत्त्वतः ॥ तत्त्वात्मस्थस्य धीरस्य कथमर्थ- रा
जने रतिः ॥१॥ आत्मज्ञानादहं प्रीतिर्विषयभ्रमगोचरे ॥ शुक्तेरज्ञानतो
लोभो यथा रजतविभ्रमे ॥२॥

ननु ज्ञाने सति विषयसंग्रहः कथमनुपपन्न इत्याशंक्य विषयप्रीतेरात्माज्ञानमूल-
त्वमदृष्टान्तं सोपपत्तिकमाह । आत्मज्ञानादिति ॥ अहो इति संबोधने हे शिष्य विषयभ्रम-
या गोचरे विषये प्रीतिः सा आत्माज्ञानादेव भवति । ननु ज्ञानान्न भवति । विषयात्मकोऽयमपि
तिभावः अत्र लोके प्रसिद्धं दृष्टान्तमाह । शुक्तेरिति ॥ यथा रजतविभ्रमे सति शुक्तेरज्ञानतो लो-
भो न इत्यर्थः । विषयभ्रमगोचर इत्यत्र विषयस्य
तत्त्वतया निर्नामरत्नमस्त्वनुभवसाक्षिकमित्यर्थः । विषयभ्रमगोचर इत्यत्र विषयस्य
पिपूर्वनिपातः विशेषणं विशेषणेन बहुलमित्यत्र बहुलग्रहणात् समवृत्तवत्त्वात् आत्मज्ञान
नद्विपदं विषयभ्रमगोचर इत्यनेनापि संबध्यते ॥ २॥

अष्टा० ज्ञानमूला विषयप्रीतिरिति प्रागुक्तं । ग्रन्थसर्वाध्यस्ताधिष्ठानतयात्मनि ज्ञाते सति
१२ विषयेषु न प्रीतिसंभव इत्याह ॥ विश्वं स्फुरतीति ॥ सागरे तरंगा इव यथा पृथक्सत्तारहिता
स्तद्वत् । यत्रेदं विश्वं पृथक्सत्तारहितं स्फुरति सत्तास्फूर्तिप्रदो ऽहमस्मीति विज्ञाय साक्षात्कृत्य
दीन इव ममेदं भविष्यतीति तृष्णाकुल इव किं धावसि धावसीत्याक्षेपः ॥ ३ ॥ तदेवं श्लोकत्रयेण ज्ञानिनि
षिध्यद्रूपमानं विषयव्यवहारमाक्षिप्येदानीं सर्वज्ञानिषु विषयव्यवहारं निषिध्य परीक्षार्थं

विश्वं स्फुरति यत्रेदं तरंगा इव सागरे । सोऽहमस्मीति विज्ञाय किं दीन इव धावसि ॥ ३ ॥
श्रुत्वापि शुद्धचैतन्यमात्मानमतिसुन्दरं । उपस्थेऽत्यन्तसंसक्तो मालिन्यमधिगच्छ
ति ॥ ४ ॥

गुरुराक्षिपति ॥ श्रुत्वापीति ॥ शुद्धचैतन्यं श्रुत्वापि गुरुमुखाद्वेदान्तवाक्यतः सा
क्षात्कृत्यापि उपस्थे समीपस्थे विषये ऽत्यन्तसंसक्तः सन्नात्मज्ञः कथं मालिन्यं मोहम
धिगच्छतीत्याक्षेपः ॥ अस्य प्रकरणस्य शिष्यजिज्ञासार्थमाक्षेप्यमुद्रयेयं वृत्तत्वाद
आक्षेपवाचकपदं न दृश्यते तत्र तदध्याहृत्य व्याख्यातव्यं पुनरप्यास्वयं गुरुराक्षिपति ॥ ४ ॥ १२

(४०)

पुनरप्याश्चर्यमुद्र्याहियति। सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु आत्मानमधिष्ठानभूतं पश्या
न्तः सर्वभूतानि चात्मनि चात्मनि चात्मनि रज्जौ भुजंगवद्ध्यस्तानि जानतो मुनेः विष
येषु ममत्वाननुवर्त्तते इत्याश्चर्यम्। संभाव्यं न हि शुक्तिकायामध्यस्तं रजतमिति जान
तस्तत्र ममत्वं संभवतीति भावः॥५॥ आस्थितपरमं स्वजातीविजातीयस्वगतभेदशून्य
मद्वैतमास्थितः। साक्षादनुभवन तथा मोक्षस्वरूपोऽर्थः॥ सच्चिदानंदात्मा तत्र व्यवस्थितः

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि। मुनेर्जानत आश्चर्यं ममत्वमनुवर्त्त
ते॥५॥ आस्थितः परमाद्वैतं मोक्षार्थेऽपि व्यवस्थितः। आश्चर्यं कामवशगो वि
कलः केलिशिक्षया॥६॥ उद्भूतं ज्ञानदुर्मित्रमवधार्यातिदुर्बलः। आश्चर्यं
काममाकांक्षेत् कालमंतमनुश्रितः॥७॥

तदेकरूपवतोऽपि कामवशगः सन् केलिशिक्षया नानाक्रीडाभ्यासेन विकलो दृश्यात
इत्यर्थः [illegible]॥६॥ उद्भूतमिति॥ उद्भूतं कामं ज्ञानदुर्मित्रं ज्ञानस्यात्यंतवैरिणं अवधार्य नि
निश्चित्यापि आगात्यतिदुर्बलः ज्ञातिशये ज्ञानबलेन शून्य इत्यर्थः ज्ञानी कामं विषयं आकां
क्षेत् [illegible] कामं वाञ्छतीत्याश्चर्यं कीदृशः अंतकालमंतं समीपे श्रितः न हि समीपवर्ती
[illegible]ऽन्तकाले सति विवेकिनो विषयतृष्णा युक्तेति भावः॥७॥

अ०गी०
१३

इहेति। ऐहिकामुष्मिकभोगविरक्तस्य नित्यमात्मतत्त्वमनित्यं शरीरादिकं तद्विवेकिनो मो
क्षः सच्चिदानंदस्तत्र कामोऽन्तःकरणं यस्य एवंविधस्य ज्ञानिनोपि मोक्षादेव कस्माद्भूयते नु च
न वियोगादेव विभीषिका भयं दृश्यते नहि स्वप्नदृष्टतनुधननाशोपि जाग्रतो भयंकारि
दृष्टमिति भावः॥८॥ एवमाश्चर्यमुक्त्वा पूर्वमुक्तं ज्ञानिनस्तोषरोषवर्जितत्वं वि
विक्तं तन्निरूपयति॥ धीर इति॥ धीरो ज्ञानी लोके विषयान्भोज्यमानोऽपि तथा निंदा
दिना पीड्यमानोऽपि सर्वदा आत्मानं केवलं सुखदुःखभागादिरहितं पश्यन्न तुष्यति॥

इहामुत्रविरक्तस्य नित्यानित्यविवेकिनः। आश्चर्यं मोक्षकामस्य मोक्षादेव विभीषिका॥८॥
धीरस्तु भोज्यमानोऽपि पीड्यमानोऽपि सर्वदा। आत्मानं केवलं पश्यन्न तुष्यति न कुप्यति॥९॥
चेष्टमानं शरीरं स्वं पश्यत्यन्यशरीरवत्। संस्तवे चापि निंदायां कथं क्षुभ्येन्महाशयः॥१०॥

न कुप्यति तोषरोषहेतूनां केवलात्मनि असंभवत्वादिति भावः॥९॥ किं च तोषरोष
हेतूनां स्तुतिनिंदादीनां शरीरधर्मत्वात् शरीरस्य चात्मभिन्नत्वेनानुसंधानात्कथं
ज्ञानिनस्तोषरोषविस्तारः। चेष्टमानमिति॥ स्वशरीरं स्वं आत्मभिन्नं चेष्टाश्रयत्वात्
अन्यशरीरवत् इति यः पश्यति स महाशयः संस्तवे स्तुतौ अपि च निंदायां कथं क्षुभ्ये
त् कथं तोषरोषरूपां विक्रियां व्रजेत् इत्याशयः॥१०॥

१३

25

मा पर्य्यमारकयोरसत्यत्वानुसंधानात्सन्निहितेऽपि मृत्यौ ज्ञानिनस्त्रासः कथमित्याह ॥ माया
मात्रमिति ॥ इदं दृश्यमानं विश्वं मर्य्यमारकादिरूपं समग्रं मायामात्रमसत्यरूपं पश्य
न्नतएव कुतूहलं विस्मयादिकं जायते कुत्र च विलयं यातीत्येवं रूपं कौतुकं तद्रहितस्तथा धी
रः स्वस्वरूपादविचलिता धीर्यस्य सः सन्निहितेऽपि मृत्यौ सत्यपि स कथं त्रस्यति न त्यजतीत्यर्थः ॥११॥
निर्वेदामाहरूपानोऽस्मिन्नर्थानार्थं ज्ञानिनो स्त्यमत्वमाह ॥ निस्पृहमिति ॥ यस्य नैराश्येऽपि म
हतोऽपि मानसं निस्पृहं तस्यात्मज्ञानतृप्तस्य तुलनामस्तीति ज्ञानिनः समानः सर्वमनोरथ

मायामात्रमिदं विश्वं पश्यन्विगतकौतुकः ॥ अपि सन्निहिते मृत्यौ कथं त्रस्यति धीरधीः ॥११॥
निस्पृहं मानसं यस्य नैराश्येऽपि महात्मनः ॥ तस्यात्मज्ञानतृप्तस्य तुलना केन जायते ॥१२॥
स्वभावादेव जानानो दृश्यमेतन्न किंचन ॥ इदं ग्राह्यमिदं त्याज्यं स किं पश्यति धीरधीः ॥१३॥
अन्तस्त्यक्तकषायस्य निर्द्वन्द्वस्य निराशिषः ॥ यदृच्छयागतो भोगो न दुःखाय न तुष्टये ॥१४॥

इत्यष्टावक्रोक्तोपदेशे चतुर्दशकं तृतीयप्रकरणं ॥ ०॥३॥

स्य केन समं तुलना जायते न केनापीत्यर्थः ॥१२॥ ज्ञानिनः ज्ञानोपादानादिव्यवहारमाहिद्रियमि
स्वभावादिति ॥ प्रपंचो मिथ्या दृश्यत्वात् शुक्तिकारजतवदित्यनुमानादेतत् दृश्यं न किंच
न सत्यं नास्तीति जानानो निश्चिन्वानो यो धीरधीः स इदं ग्राह्यमिदं त्याज्यमिति किं
च पश्यतीत्यर्थः ॥१३॥ ज्ञानिनो भोगेऽपि तस्य सुखदुःखाभावमाह ॥ अन्तस्त्यक्तेति ॥ अन्तःकरणे त्यक्ताः कषाया विषयवासना
यन तस्य निर्द्वन्द्वस्य शीतोष्णादिसमचित्तस्य अतएव निराशिषः विषयवांछाविहीनस्य यदृ
च्छया दैवयोगादागतः प्राप्तो भोगः भुज्यमानो विषयो दुःखाय न भवति तुष्टये न भवति ॥१४॥

(२८)

गा०टी० १४

गुरुरेवमुपाश्रितः शिष्यो ज्ञानं देशोपदेशमन् ज्ञानिनश्शेषचेष्टानां स्पृहमाचष्टे संभवे ॥१॥
तं वक्ता च गुरुरुत्तमो परीक्षार्थमाश्रितः शिष्यः प्रारब्धवशात् स्थितानां वृत्त्या ज्ञानिनस्यपि संवि-
भवतरणमुपयति ॥ आत्मज्ञानेन हर्षस्य शोकस्य हानि ॥ षट्कैः हन्तेति ॥ हन्तेत्यात्मज्ञानो हर्ष-
सूचितो हर्षे । हे गुरो आत्मज्ञस्य सर्वोपविष्टानन्दतया स्वात्मानं जानतः । एतत्स्वैव धीरस्य
विषयैरविक्षिप्तचित्तस्य भोगलीलया विषयभोगादिरूपया लीलया क्रीडया प्रारब्धव-
शप्रवृत्तया खेलतः । क्रीडतः संसारवाहीकैः संसारवृत्तिपशुभिः मूढैः देहाद्यात्म-

हन्तात्मज्ञस्य धीरस्य खेलतो भोगलीलया ॥ न हि संसारवाहीकैर्मूढैः सह
समानता ॥ यत्पदं प्रेप्सवो दीनाः शक्राद्याः सर्वदेवताः ॥ अहो तत्र स्थितो योगी
न हर्षमुपगच्छति ॥२॥

वेदिभिः सह नहि समानता नैव तुल्यत्वं । तदुक्तं भगवता तत्त्ववित्तु महाबाहो गुणक-
र्मविभागयोः ॥ गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥१॥ न तु संसारव्यवहारसक्तो ज्ञा-
नी कथं संसारिणस्य इत्याशङ्क्य हर्षादिरहितत्वात् तस्य विलक्षणत्वं कथयति ॥ अहो इति ॥ सं-
बोधने हे गुरो यत्पदं प्रेप्सवः शक्राद्याः सर्वदेवता अपि यत्पदं प्रेप्सवो वाञ्छन्तो दुःखी-
भूत्वा दीनाः सन्तः दशाहताः श्रान्ता वर्तन्ते तत्र सच्चिदानंदरूपे पदे स्थितः सन् तं लब्ध्वा
वैविध्ये ज्ञानी न वर्तमानो योगी च सुखात्सालोक्यो विषयभोगान् हर्षं प्राप्नोति न

२१ १४

२७

तन्नस्याविद्यया किं करत्वं वक्तुं पुण्यपापसंस्पर्शमाह॥ तत इति॥ तत्त्वंपदार्थैक्यमितस्य पुण्यपापाभ्यां सततं स्पृष्टे ततः लोकधर्मात्तेषां स्पर्शः संबंधो न जायते ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तेन नैव लिप्यते तत्र दृष्टान्तमाह॥ यथा हि आकाशस्य धूमेन सह दृश्यमानापि संगतिर्नास्ति तथा त्वत्तस्य पुण्यादिसंगतिरित्यर्थः॥३॥

ततस्तस्य पुण्यपापाभ्यां स्पर्शोऽपि हि न जायते॥ न ह्याकाशस्य धूमेन दृश्यमानापि संगतिः॥३॥ आत्मैवेदं जगत्सर्वं ज्ञातं येन महात्मना॥ यदृच्छया वर्तमानं तं निषेद्धुं क्षमेत कः॥४॥

ननु कर्मत्यागे कृते कथं न पुण्यादिस्पर्श इत्याशंक्याह ज्ञानिनो विधिनिषेधाद्यनियतत्वमाह॥ आत्मैवेति॥ येन महात्मना इदं दृश्यमानं सर्वजगत् आत्मैवेति ज्ञातं तेन ज्ञानिना यदृच्छया प्रारब्धवशाद्दैववर्तमानं प्रवर्तमानं कोऽपि न कर्तव्यो निषेद्धुं प्रवर्तयितुं वा क्षमः समर्थो न कोऽपीत्यर्थः॥ तदुक्तं शारीरकभाष्ये॥ अविद्यावद्विषयाणि वेदान्तानि॥ प्रबोधनीयस्य चात्मनो राजवदिति स्मृतिरपि॥४॥

अष्टा०
१५

न तु ज्ञानिनोऽपि न यदृच्छया प्रवृत्तेः किं लिङ्गमेव इच्छानिच्छयोर्निवृत्तिरपि तु मशकपात्रा-
दिलक्षणं स्यात्तत्राह आब्रह्मेति॥ यद्यपि आब्रह्मस्तम्बपर्यन्ते भूतग्रामे निरोधवि वर्जितोऽपि तु म-
शकोऽस्ति तथापि विदुषः स्वेच्छाद्वेषनिवृत्तिसामर्थ्यमतो यदृच्छया प्रवर्त्तमानो ज्ञानी न विधि-
निषेधवानित्यर्थः॥५॥ अद्वैतज्ञाने न द्वितीयस्य वधीनत्वात् ज्ञानिनो भयहेतुः कोपि नास्ति
इत्युपसंहरति॥ आत्मेति॥ आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरमिति के श्रीमत्सम्प्रदाये

आब्रह्मस्तम्बपर्यन्ते भूतग्रामे चतुर्विधे॥ विज्ञस्यैव हि सामर्थ्यमिच्छानिच्छाविव-
र्जने॥५॥ आत्मानमद्वयं कश्चिज्जानाति जगदीश्वरं॥ यद्वेत्ति तत्स कुरुते न भ-
यं तस्य कुत्रचित्॥६॥ इत्युल्लासपञ्चकं॥ ॥४॥

कश्चिदेव जगदीश्वरं तत्पदार्थं आत्मानं त्वंपदार्थं अद्वयं अभिन्नं जानाति स यद्वेत्ति प्रारब्धवश-
द्विहितानुवृत्तेर्हि कर्त्तव्यमिति मन्यते तत्करोति। एवं कुर्वतस्तस्य कुत्रचित् इहलोके अमुत्र वा
भयं नास्ति भयहेतोर्द्वैतज्ञानबाधितत्वादिति भावः॥६॥ इत्यष्टावक्रमुनिविरचिते
अध्यात्मशास्त्रे शिष्यप्रोक्तात्मानुभवोल्लासपञ्चकविवरणं॥ एवं उल्लासपञ्चकेन स्वशिष्य-
परीक्षिते॥ गुरुरुपदेशार्थं तं प्रत्येवमथाब्रवीत्। एवमुल्लासपञ्चकेन शिष्यप-
रीक्षिते सति पुनः दृढोपदेशार्थमाचार्यो लयमुपदिशति श्लोकचतुष्टयेन। न तेति॥

१५

श्री

इत्येवं शुद्धबुद्धस्वभावस्य तव केनापि देहगेहादिना अहंकारममकारास्पदेन न संगोऽस्ति अ-
तः शुद्धः सन् त्वं किं त्यक्तुमिच्छसि न किमपीत्यर्थः तस्मात् संघातस्य देहस्य विलयं कुर्वन् अहं देह इ-
ति निरसनं कुर्वन् एवं देहादिनिरसनरूपमेव लयं व्रज॥१॥ उदेतीति॥ हे शिष्य भवतः स-
काशाद्विश्वमुदेति भवद्भिन्नमेव यथा वारिधेः सकाशात् बुद्बुदो वारिधेर्भिन्नः। एवं विदन् निरस्त-
विश्वप्रकारेण एकं सजातीयादिभेदरहितमात्मानं ज्ञात्वा एवंप्रकारेण ज्ञानमेव लयं व्रज पूर्व-
वत्॥२॥ ननु प्रत्यक्षं दृश्यमानं त्वया हारसर्पादिभेदे प्रतीयमाने कथं हारादिलय इत्याशंक्याह।

न ते संगोऽस्ति केनापि किं शुद्धस्त्यक्तुमिच्छसि। संघातविलयं कुर्वन्नेवमेव लयं व्रज॥१॥
उदेति भवतो विश्वं वारिधेरिव बुद्बुदः। इति ज्ञात्वैकमात्मानमेवमेव लयं व्रज॥२॥
प्रत्यक्षमप्यवस्तुत्वाद्विश्वं नास्त्यमले त्वयि। रज्जुसर्प इव व्यक्तमेवमेव लयं व्रज॥३॥
समदुःखसुखः पूर्ण आशानैराश्ययोः समः। समजीवितमृत्युः सन्नेवमेव लयं व्रज॥४॥

॥ इति लयचतुष्कं ॥

प्रत्यक्षमिति॥ प्रत्यक्षमपि दृश्यमानं दृश्यं विश्वं अमले त्वयि नास्ति अवस्तुत्वात् रज्जुभुजं-
गवत् तस्मादेवमेव लयं व्रज। एतदिन्नीस्य हेयोपादेयशून्यो वा भावो दिव्यः॥३॥ समेति॥ पूर्ण-
स्वात्मानं दृष्ट्वा पूर्णः स्वमत एव दुःखसुखयोः कुद्भूतयोः सुखदुःखयोः समः आशानैराश्ययोः समः
समजीविते मृत्यौ वा समो निर्विकारः सुखदुःखादीनामनात्मधर्मत्वानुसंधानात्
दुःखादिषु समः अत एव निरूपं लयं व्रजेत्यर्थः॥४॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टा-
वक्रटीकायामाचार्यलोके लयचतुष्कं नाम पंचमं प्रकरणं॥५॥ श्री॥

त्यक्ष्ये योगानन्तरं त्यागस्य व्यवहारं निरंकुशं। गुरोः शिष्यश्रोता सादृश्वीजरुमुत्तरं॥४॥
तत्त्वत्यागयोगावे संसारस्थितिरूपो निरंकुशः प्रसरस्यादित्याशंक्य तस्य निष्फलत्वमाह मय्यनुभव
सिद्धकेनासंबलेन शिष्यः। मयीति। मय्यानन्दमिति ज्ञानेनेन महासमुद्रे विश्वरूपः पोतः नौका
स्वान्तवातेन मनःपवनेन इतस्ततो भ्रमति। तत्र ममासहिष्णुता असहनता नास्ति। समुद्रस्य
वनौकापरिभ्रमणं इत्यर्थः॥१॥ जगज्जीवभावं हारस्यापि निवृत्तं भ्रमो भ्रमः पूर्वमुक्तोऽथ जगदुद
यास्तमयोरपि नास्मिन्नेतेन हानिः। मयीति। मयि चिद्रूपे निजानन्देनाविनाशरहिते महति व्या

मय्यनन्तमहाम्भोधौ विश्वपोत इतस्ततः। भ्रमति स्वान्तवातेन न ममास्त्यसहिष्णुता॥१॥
मय्यनन्तमहाम्भोधौ जगद्वीचिः स्वभावतः। उदेतु वास्तमायातु न मे वृद्धिर्न च क्षतिः॥२॥
मय्यनन्तमहाम्भोधौ विश्वं नाम विकल्पना। अतिशान्तो निराकार एतदेवाहमास्थितः॥३॥

पकेम्भोधौ समुद्रे जगद्रूपा वीचिः स्वभावतः दशक्यादिप्रभावात् उदेतु वा अस्तमायातु
वा मम मनागपि वृद्धिर्नास्ति व्यापकत्वात् तदप्यगमे च क्षतिर्नास्ति अनन्तत्वादित्यर्थः॥२॥
पूर्वं दृष्टान्तेन स्वस्यात्मनः परिणामित्वं स्यादित्याशंक्याह। मयीति॥ मय्यनन्तमहाम्भोधौ
नाम प्रसिद्धं विश्वं कल्पनामात्रमेव न तु तत्त्वं किं तु अतः कारणादहमतिशान्तः प्रपंचोपशम
रहितः अत एव निराकारः। एतदेवमज्ञानमेव आस्थितः आश्रितोऽस्मि। नन्वेतय
योगं तस्य पूर्वमेव दूषितत्वात्॥३॥ अतिशान्तत्वमेव स्पष्टयति। नात्मेति॥

आत्मा भावेषु देहादिषु नास्ति तथा नास्ति व्यापकत्वात् । नो भावो देहादिस्तत्रात्मनि नास्ति अ-
नन्ते निरंजनत्वात् इति कारणात् अहमसक्तः सङ्गरहितो निःस्पृहः । इच्छादिधर्मासंश्लिष्टः शा-
न्तः एतदेवाश्रितः स्यामित्यर्थः ॥४॥ इत्यादि दर्शितं तत्त्वं तरमाह॥ अहो इति॥ अहो इत्याश्चर्ये॥ रूपमलौकि-
कं चिन्मात्रं चैतन्यमात्रमेवाहं जगत्सर्वं प्रपंचजातं इंद्रजालोपमं दर्शनकालेऽपि पृथक्स-
त्तारहितं अतो विश्वस्य पृथक्सत्तारहितत्वात् मम कुत्र वस्तुनि कथं केन प्रकारेण हेयो-

नात्मा भावेषु नो भावास्तत्रानंते निरंजने॥ इत्यसक्तोऽस्पृहः शांत एतदेवाहमा-
स्थितः॥४॥ अहो चिन्मात्रमेवाहमिंद्रजालोपमं जगत॥ अतो मम कथं कुत्र
हेयोपादेयकल्पना॥५॥ इत्यनुभवपंचकं॥ ॥६॥

पादेयबुद्धिः स्यात् न कुत्रापीत्यर्थः॥५॥ ॥इत्यष्टावक्रटीकायां अनुभवपंचकं विव-
रणं॥॥६॥ इत्थं परीक्षितज्ञानं शिष्यमेवाभिनंदितुं गुरुर्बंधस्य मोक्षस्य व्यवस्थां
सम्यगब्रवीत॥१॥ तदेवसप्तभिः प्रकरणैः स्वशिष्यसम्पकारी ह्यवं बंधमोक्षव्य-
वस्थापनच्छलेन गुरुः सशिष्यानुभवमभिनंदति॥ चतुर्भिः श्लोकैः॥
॥तदेति॥१॥

३२

अष्टा०
८

हे शिष्य त्वं ममकथं हेयोपादेयरूपनास्ति तं यत् त्वया ज्ञातं तत्तथैव ॥ यदा चित्तो विषयाकांक्षी विकारवद्भवति तदेव जीवस्य बंध इत्यर्थः ॥१॥ मोक्षोपि चित्तवांछादि निर्मुक्तिरित्यर्थः ॥२॥ तदेव पृथक्कृत्य बंधमोक्षावुक्तौ अन्यथा एवं समुच्चयेन बंधमोक्षावात् ॥ तदा बंध इति ॥ यदा चित्तं कास्वपि नाम दृष्टिषु संसक्तं तदा बंधः यदा चित्तं सर्वास्वपि विषयदृष्टिषु संसक्तं न भवति तदा मोक्ष इत्यर्थः ॥३॥ चित्तानवृत्यासर्वापि विषयदृष्टिः बंधहेतुः तन्निवृत्तौ मोक्ष इति पूर्व

तदा बंधो यदा चित्तं किंचिद्वांछति शोचति ॥ किंचिन्मुंचति गृह्णाति किंचिद्धृष्यति कुप्यति ॥१॥ तदा मुक्तिर्यदा चित्तं न वांछति न शोचति ॥ न मुंचति न गृह्णाति न हृष्यति न कुप्यति ॥२॥ तदा बंधो यदा चित्तं सक्तं कास्वपि दृष्टिषु ॥ तदा मोक्षो यदा चित्तमसक्तं सर्वदृष्टिषु ॥३॥ यदा नाहं तदा मोक्षो यदाहं बंधनं तदा ॥ मत्वेति हेलया किंचिन्मा गृहाण विमुंच मा ॥४॥ इत्य

एवं बंधमोक्षाख्यमष्टमं ॥ ॥८॥

मुक्तं ॥ तथाप्यहंकार निवृत्तौ मोक्षः तदनिवृत्तौ बंध इति वदन् शिष्योक्तमर्थमिनं दिनुम नुवदति ॥ यदा नाहमिति ॥ यदाहमिति पेव रूपः प्रथमो ध्यासो नर्थमूलभूतो निवर्तते तदा मोक्षः यदा चेन निवर्तते तदा बंध इति तस्माद्धेलया अनायासेनैव त्वं कोपादानादि क्रियया तत्रकर्तृत्वाभिमानं ततोनेन कर्तृत्वाभिमानो निवर्तत इति भावः ॥४॥ इत्यष्टावक्रटीकायां गुरुशिष्यसंवादे बंधमोक्षव्यवस्थाप्रकरणं ॥ ॥८॥ शिष्योक्तमनुभवं स्थैर्याय द्रढयितुं गुरुरोक्त्याप्य निर्वेदः स्पृहमप्यमितिरिति कृतादि त्यजनात्स्वयं मत्वेति हेलया किंचिन्मा गृहाण विमुंच

८

कृताकृते द्वंद्वे कर्तव्यं इदं अकर्तव्यमिति निश्चित्य अभिनिवेशं द्वंद्वानि सुखदुःखादीनि कस्य कदा शान्तानि निवृत्तानि न कस्यापि शान्तानीत्यर्थः । एवं ज्ञात्वा इह कृताकृतादि॥ द्वंद्वत्यागात् अत्यन्तं त्यक्तुमशक्यः ४ निर्वेदात् अभिनिवेशादि परित्यागात् एवं त्यागपरो भव कीदृक् अव्रती नास्ति व्रतं कर्तव्यग्रहो यस्य सः॥१॥ चित्तधर्मत्यागरूपो निर्वेदः कस्यचिदेव स्यात् न सर्वस्येत्याह॥ कस्यापीति॥ हे तात शिष्य सत्त्वेषु मध्ये कस्यापि विरलस्य धन्यस्य स्यात्॥

कृताकृते च द्वंद्वानि कदा शान्तानि कस्य वा॥ एवं ज्ञात्वेह निर्वेदाद्भव त्यागपरोऽव्रती॥१॥ कस्यापि तात धन्यस्य लोकचेष्टावलोकनात्॥ जीवितेच्छा बुभुक्षा च बुभुत्सोपशमं गताः॥२॥ अनित्यं सर्वमेवेदं तापत्रितयदूषितं॥ असारं निंदितं हेयमिति निश्चित्य शाम्यति॥३॥०॥

विनाशरूपलोकचेष्टावलोकनात् जीवितेच्छा भोगेच्छा ज्ञानेच्छा च उपसमं गताः॥ इदं ज्ञात्वा द्वंद्वं निर्वेदसंपन्नं शिष्यं कालिनं दृढमेवाव्यतेन नूतनदिशा तेइति स्थानन्तमेव॥ ॥२॥ ननु ज्ञानिनां सर्वत्रेच्छोपशमः किं हेतुकः इत्यतआह॥ अनित्यमिति॥ इदं दृश्यमानं सर्वं प्रपंचजातं अनित्यं चैतन्येऽध्यस्तत्वेन तथा पृथक्सत्त्वेन गृह्यमाणं नस्तत्‌ अध्यात्मिकाधिदैविकाधिभौतिकात्मतापत्रितयदूषितं असारं तुच्छं एवं हेयं पृथक् सत्तया नैवाऽदरणीयमिति निश्चित्य ज्ञानी शाम्यति कृत्यापीच्छां न करोति॥४

१८

देहिनां नानारस्तु कर्मवशाद्दुःखं प्राप्तवित्तत्वात् तेषां नैष्ठिकविरक्तत्वयथाप्राप्तभोगान् भुक्तिमवाप्नुयादित्यर्थः॥ कोऽसाविति॥ यत्र नृणां देहिनां निरस्तसुखदुःखादीनि न संति। असौ कः कालः किं वा वयः बाल्यादिवयो लक्षणापत्र शरीरावस्था कापि पुनः कापीति विचार्य त्यक्तानि द्वंद्वान्यपेक्ष्य तत्रेच्छामनिच्छां च कृत्वा यथाप्राप्तेषु नानासक्ततया वर्तमानः सिद्धिं मुक्तिं प्राप्नुयादित्यर्थः॥ ४॥ तर्कशास्त्रादिज्ञानैर्बुनिष्ठानकर्तृत्याना नानाविप्रतिपत्तिग्रस्तत्वात् नाधिकमस्तु नाप्येकं योगादिष्वपीत्याह॥ नानामतमिति॥

कोऽसौ कालो वयः किं वा यत्र द्वंद्वानि नो नृणाम्॥ तान्युपेक्ष्य यथाप्राप्तवर्ती सिद्धिमवाप्नुयात्॥ नानामतं महर्षीणां साधूनां योगिनां तथा॥ दृष्ट्वा निर्वेदमापन्नः को न शाम्यति मानवः॥ ५॥

नानामतं दृष्ट्वा तन्महर्षीणां गौतमजैमिनिप्रमुखानां मतं नानाविधं परिच्छिन्नं दृष्ट्वा तर्कशास्त्रादियो निर्वेदमापन्नः तथा साधूनां कर्मनिष्ठानां मतं नानाविधं केचिद्धोमपराः केचिज्जपपराः केचित्तु तीर्थयात्रादिपरा इति नानाविधं दृष्ट्वा कर्मभ्योऽपि निर्वेदमापन्नस्तथा योगिनां मतं नानाविधं केचिदष्टाङ्गयोगपराः केचिन्महदादिप्रसंख्यानपरा इति नानाविधं दृष्ट्वा योगादिभ्योऽपि निर्वेदमापन्नः केवलमात्मानुसंधाननिवृत्तः को न शाम्यति कः सुखं न प्राप्नोतीत्यर्थः॥ ५॥ १८

केवलज्ञाननिष्ठामेवाश्रित्य कर्मादिकं मा कुर्वित्याह॥ कृत्वेति॥ निर्वेदसमतायुक्त्या निर्वेदेन मम विषयानासक्तिस्तथा शत्रुमित्रेषु समत्वं सर्वत्रात्मबुद्धिः युक्तिर्नमस्कृत्यनुग्राहकस्तर्कः। एतैः चैतन्यस्य मूर्तिं कृत्वा दृश्यमूर्तिपरिज्ञानं स्वरूपसाक्षात्कारं कृत्वा तदनेन रं नास्ति कश्चिद्गुरुर्यस्य सः न किं गुरुरेव विधेयः संसृतेः संसारादात्मानं तारयति॥ ६॥ चैतन्यस्य स्वरूपज्ञानोपायमाह। पश्येति॥ हे शिष्य भूतविकारान्देहेन्द्रियादीन् यथार्थतस्त्वं भूतमात्रान् पश्य तत्क्षणात् आत्मस्वरूपान । एवं सति

कृत्वा मूर्तिपरिज्ञानं चैतन्यस्य न किं गुरुः॥ निर्वेदसमतायुक्त्या यस्तारयति संसृतेः॥६॥
पश्य भूतविकारांस्त्वं भूतमात्रान्यथार्थतः। तत्क्षणाद्बन्धनिर्मुक्तः स्वरूपस्थो भविष्यसि॥७॥ वासना एव संसार इति सर्वा विमुञ्च ताः॥ तत्त्यागो वासनात्यागात्स्थितिरद्य यथा तथा॥८॥ ॥इति निर्वेदाष्टकं॥ ९॥

तत्क्षणात् बन्धनिर्मुक्तः शरीराहंभावनिर्मुक्तः सन् शरीरादिविविक्तात्मस्वरूपस्थो भविष्यसि शरीरादेरनात्मतया ज्ञाते सति तत्साक्षिभूतस्यात्मनः अहंप्रतीतेः स्वत एव इति भावः॥७॥ ननु एवमात्मनि ज्ञातेऽपि तत्र निष्ठा कथं स्यादित्याशंक्य वासनात्यागाद् इत्याह॥ वासना इति॥ वासना विषयवासना एव संसार इति कारणात् ता वासनाः सर्वा विमुञ्च वासनात्यागात् आत्मनिष्ठायां सत्यां तस्य संसारस्य त्याग इत्यर्थः। अद्य अधुना वा वासनात्यागे सति स्थितिः यथा प्रारब्धं तथैवेत्यर्थः॥८॥ इति निर्वेदाष्टकं विवरणं॥९॥

36

१५

विषया लाभमात्रेऽपि तुष्टिनिर्वेद ईरितः ॥ तस्मिन्नर्थे च विषयेषु तृष्णां त्याजयति ॥१॥
विषयेषु लोभेनापि संतोषरूपो निर्वेदः प्रागुक्तः । अथेदानीं विषयतृष्णोपशमनमपि नेदमु
मुक्षयाग्रमाह ॥ विहायेति ॥ कामं वैरिणं तानशत्रुं विहाय तथाऽनर्थसंकुलं कामजनि
तव्यथानेकपुरुषदुःखसंकुलं क्रोधं विहाय तथा च एतयोः कामार्थयोः अनर्थयोर्हेतुं
धर्ममपि विहाय सर्वत्र त्रिवर्गहेतुकर्मसु अनादरं उपेक्षां कुरु ॥१॥ ननु मित्रक्षेत्रादिकृते
षु कर्मसु कथमनादरः इत्याशंक्य मित्रादीनामनित्यत्वमाह ॥ स्वप्नेति ॥ हे शिष्य मित्रादि
संपदः स्वप्नेन्द्रजालवत् पश्य यतो दिनानि त्रीणि पंच वा स्थायिन्य इत्यर्थः ॥ सर्वत्रा
नादरे हेतुः ॥

विहाय वैरिणं कामं क्रोधं चानर्थसंकुलम् ॥ धर्ममप्येतयोर्हेतुं सर्वत्रानादरं कुरु ॥१॥
स्वप्नेन्द्रजालवत्पश्य दिनानि त्रीणि पंच वा ॥ मित्रक्षेत्रधनागारदारादायादिसंपदः ॥२॥
यत्र यत्र भवेत्तृष्णा संसारं विद्धि तत्र वै ॥ प्रौढवैराग्यमाश्रित्य वीततृष्णः सुखी भव ॥३॥
तृष्णामात्रात्मको बंधस्तन्नाशो मोक्ष उच्यते ॥ भवासंसक्तिमात्रेण प्राप्तितुष्टिर्मुहुर्मुहुः ॥४॥

इत्यं विचार्य नैराश्ये तृष्णायुक्तार्थहेतुरित्याह ॥ यत्रेति ॥ यत्र यत्र येषु येषु प्रसिद्धेषु वि
षयेषु तृष्णा भवेत् तत्र एव संसारं विद्धि विषयतृष्णाया एव कर्मद्वारा संसारहेतुत्वात् अतः प्रौढ
वैराग्यमाश्रित्य त्यक्त्वा एव वीततृष्णः तृष्णारहितः सन् आत्मनिष्ठया सुखी भवे
त्यर्थः ॥३॥ अत्र हेतुमाह ॥ तृष्णेति ॥ तृष्णामात्रे स्वरूप एव बंधः कर्मवासनाबंधहेतुत्वात् त
न्नाशः तृष्णानाश एव मोक्षः निवृत्तिहेतुत्वात् तन्नाशो मोक्ष उच्यते अतएव हे शिष्य भवतीति
भवः देहादिर्विषयस्तत्रासंसक्तिमात्रेण मुहुर्मुहुर्वारंवारं प्राप्तिः तुष्टिः आत्मप्राप्तिर्यासंतो
षः स्यात् तेन तृष्णाया एव मोक्षहेतुरित्यर्थः ॥ प्राप्तिस्तुष्टिरिति पाठे प्राप्तिः स्यादित्यर्थः

१५

37

ननु ब्रह्मस्वरूपानुभवः कथं स्यात् येषां शंक्याह ॥ त्वमेक इति ॥ हे अज गतित्रयस्य पदार्थानि रूपात्मा जगतः अविद्यावत्र आत्मा तावत् त्वमेवैकश्चेतनः शुद्धो न तु चिद्भिन्न इति स्वात्मानमेवैकं पूर्णं जानीहि नान्यापुरातन ब्रह्मसाक्षात्कारो नापि जगद्ब्रह्मसाक्षात्कारो जगतः असत्वात् जडत्वाच्च नापि अविद्याब्रह्मसाक्षात्कारस्तस्या अपि सदसद्विलक्षणत्वेन अनिर्वचनीयरूपत्वात् तस्याश्च नव ब्रह्मसाक्षात्कारो न किंचिदपीत्यर्थः ॥५॥ अत विश्वमसदित्युक्तं तदेव द्रढयति ॥ राज्यमिति ॥ राज्यादीनि सर्वाणि संसक्तस्यापि आसक्तिं कुर्वाणस्यापि

त्वमेकश्चेतनः शुद्धो जडं विश्वमसत्तथा ॥ अविद्यापि न किंचित् सा का बुभुत्सा तथापि ते ॥५॥ राज्यं सुताः कलत्राणि शरीराणि धनानि च ॥ संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि ॥६॥ अलमर्थेन कामेन सुकृतेनापि कर्मणा ॥ एभ्यः संसारकान्तारे न विश्रान्तमभून्मनः ॥७॥

तव जन्मनि जन्मनि नानाजन्मसु नष्टानीत्यतो विश्वमसदित्यर्थः ॥६॥ बुभुत्सापि न कर्तव्येति प्रागुक्तं तत्र धर्मार्थकाममोक्षाणां कार्यत्वमाह ॥ अलमिति ॥ अर्थादिना अलं अर्थधर्मकामेषु इच्छा न कार्येत्यर्थः । अत्र हेतुमाह ॥ यतः कारणात् संसारकान्तारे संसाररूपे दुर्गमे वर्त्मनि एभ्यः सुतेभ्यः कामार्थेभ्यः विश्रान्तं त्वन्मनो विक्षेपरहितं नाभूत् तोषादिकं तृष्णानिवर्तकं तन्नेत्यर्थः ॥७॥ तृष्णाया उपशमः प्रागुक्तः अथ क्रियोपश

38

हे शिष्य कृपाया सदं प्रयासदं तदेव दुःखं कर्म कायादिना कति जन्मानि न कृतं अपि तु
यावद्यप्राचीन सर्वं न नमः स्वपि कृतं कर्म तत्तुल्ययानर्थं तदेव तस्मात्तस्माद् अद्यापि
अधुना कर्म उपरम्यतां॥८॥ इत्याष्टावक्रे गुरुकृतोपशमाष्टकप्रकरणं॥ १०॥
उक्तोपशांतिर्निर्विज्ञानं विना कस्यापि जायते। ~~[struck]~~ इति निश्चयेनैव मेवाह गुरुर्ज्ञानमूलाष्टकं।
उक्तोपशांतिर्विज्ञानादेव स्यान्नत्वन्यथेति बोधयितुं ज्ञानाष्टकमाह॥ तत्रादौ ज्ञानसाधना

कृतं न कति जन्मानि कायेन मनसा गिरा॥ दुःखमायासदं कर्म तदद्याप्युपरम्यतां॥८॥

इत्युपशमाष्टकं॥१०॥

भावाभावविकारश्च स्वभावादिति निश्चयी॥ निर्विकारो गतक्लेशः सुखेनैवोपशाम्यति॥१॥ ईश्वरः सर्वनिर्माता नेहान्य इति निश्चयी॥ अंतर्गलितसर्वाशः शांतः क्वापि न सज्जते॥२॥

न्याह॥ भावभावेति॥ भावाभावरूपो विकारः स्वभावात्। मायायत्संस्कारादेव जायते न तु निर्विकारादात्मन इति निश्चयवान् पुरुषो निश्चयबलात्सुखेनानायासेनैवोपशाम्यति॥१॥ ननु मायाजडत्वात् नन्तदेव कथं भावाभावविकार इत्याशंक्याह॥ ईश्वर इति॥ ईश्वर एव सर्वः निर्माता न त्वन्यो जीवः ईश्वरपरवशत्वात् इति निश्चयी पुरुषो निश्चयवशादेवांतर्गलितसर्वाशः गतसर्वतृष्णः शांत एव शांतो निश्चलो

नन्वीश्वरश्चेत्सर्वनिर्माता तर्हि कांश्चित्सुखिनः कांश्चिद्दुःखिनो रचयतस्तस्य वैषम्यनैर्घृण्ये स्यातामित्याशंक्याह॥ आपद इति॥ काले समयविशेषे आपदः संपदश्च दैवात्प्राक्तनादृष्टादेवेश्वरप्रदियाचिता देवेति निश्चयी एतादृशो वीततृष्णः॥ अत एव नित्यः स्वस्थेन्द्रियो विषयानाहृतेन्द्रियः अत एव न वांछति न शोचति चेत्यर्थः॥२॥ ननु तत्त्वनिश्चयेऽपि कर्मासक्तिरेव दृश्यत इत्याशंक्याह॥ सुखेति॥ कर्मफल

आपदः संपदः काले दैवादेवेति निश्चयी॥ तृप्तः स्वस्थेन्द्रियो नित्यं न वांछति न शोचति॥३॥ सुखदुःखे जन्ममृत्यू दैवादेवेति निश्चयी॥ साध्यादर्शी निरायासः कुर्वन्नपि न लिप्यते॥४॥ चिंतया जायते दुःखं नान्यथेहेति निश्चयी॥ तया हीनः सुखी शांतः सर्वत्र गलितस्पृहः॥५॥

भूते सुखादिके दैवादद्दृष्टादेवेति निश्चयी अत एव मया इदं फलं साध्यमित्यदर्शी अत एव निरायासः श्रमरहितः प्रारब्धवशात्कुर्वन्नपि न लिप्यते कर्मजानर्थभागी न भवतीकर्तृत्वाध्यासरहितत्वादित्यर्थः॥४॥ ननु कुर्वंश्चेत्कथं निरायास इत्याशंक्याह॥ चिंतयेति॥ इह दुःखं चिंतया जायते नान्यथेति निश्चयी अत एव तया चिंतया हीनः अत एव शांतः स्थिरांतःकरणः अत एव सर्वत्र सुखतत्साधनयोर्गलितस्पृहः पुरुषः सुखी भवतीत्यर्थः॥५॥ उक्तसाधनैः सिद्धज्ञानीनां निजदशां निरूपयति॥ नाहमिति॥६॥

२१

अहं देहो न तथा मे देहो न किंतु नित्यबोधोऽहमिति ज्ञानवशादितो देहनिवृत्ताहंममाभिमानो देहादिनाकृतमकृतं च मया कृतमिति न स्मरति यथा कैवल्यं प्राप्तः कैवल्यं प्राप्तः कृताकृतेन स्मरतीत्यादि इत्यर्थः ॥६॥ आब्रह्मेति ॥ ब्रह्मणः आरभ्य स्तम्बपर्यन्तं सर्वं जगदहमेवेति ब्रह्मवृत्तिनिश्चयवान् पुरुषः निर्विकल्पः संकल्पविकल्पशून्यः अत एव शुचिर्विविधासंगरूपमलरहितः अत एव शान्तो निश्चलान्तःकरणः प्राप्ताप्राप्तयोर्विविधयोर्निर्वृतिर्नः परमसंतोषवान् आत्मानन्दपूर्णत्वादित्यर्थः ॥७॥

नाहं देहो न मे देहो बोधोऽहमिति निश्चयी ॥ कैवल्यमिव संप्राप्तो न स्मरत्यकृतं कृतं ॥६॥ आब्रह्मस्तम्बपर्यन्तमहमेवेति निश्चयी ॥ निर्विकल्पः शुचिः शान्तः प्राप्ताप्राप्तविनिर्वृतः ॥७॥ नानाश्चर्यमिदं विश्वं न किंचिदिति निश्चयी ॥ निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति ॥८॥ इति ज्ञानाष्टकं ॥ ११ ॥

नन्वात्मज्ञानी कथं निर्विकल्पादिरूपः स्यादित्याशंक्याह । नानेति ॥ अधिष्ठानतत्त्वसाक्षात्कारेणाध्यस्तबाधे सति नानाश्चर्यमयं विश्वं न किंचित् पृथक् सत्ताशून्यमिति निश्चयी पुरुषः निवृत्तवासनः केवलचिद्रूपः सन् न किंचिदिव विशेषव्यवहारगोचरतामेव शाम्यति निवृत्तकार्यकारणोपाधिर्भवति । तत्त्वज्ञानेन सर्वस्यापि प्रपञ्चस्य निवृत्तेरित्यर्थः ॥८॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां ज्ञानाष्टकं

२१

(८६)

गुरुणोदीरितं ज्ञानं न किंचिदवशिष्यति॥ तस्यैवास्मिन्नप्यभिरस्यपातुंशिष्यो वदति सांप्रतं॥१॥ उक्तेनोनाभ्यहं केन किंचिदवशिष्यतीति तद्वक्ति शिष्यः स्वस्मिन्निःशदपि नेमेवमेवाहमास्था॥ नत्र प्रथमं कायवाङ्मनसां व्यापारो परमाहुः कायेति॥ अहं पूर्वमपि कायिककर्मपक्षमसहस्ततोऽहं नो वाचिक समासहः जप कर्मासहः स्वप्यसावाल्पेन वेदान्ता कर्ममर्यादादितो नतिक्रमीत्यर्थः॥ मनो व्यापाररूपाया चिन्तात्रासहस्तस्मादहं नोः एवमेव निर्व्यापार एवाहमास्थितः॥ समस्तेनास्थितःत्यर्थः ॥१॥ उक्तं व्यापारत्रयोपरिसहं नवदस्त्रेवोन्मनुवदति॥ प्रीत्यभावेनेति॥०॥

कायकृत्यासहः पूर्वं ततो वाग्विस्तरासहः। अथ चिन्तासहस्तस्मादेवमेवाहमास्थितः॥१॥
प्रीत्यभावेन शब्दादेरदृश्यत्वेन चात्मनः। विक्षेपैकाग्रहृदय एवमेवाहमास्थितः॥२॥
समाध्यासादिविक्षिप्तौ व्यवहारः समाधये। एवं विलोक्य नियममेवमेवाहमास्थितः॥३॥

हृपि शब्दफलजनकस्य शब्दादेः शब्दकायकर्मद्वयस्य प्रीत्यभावेन प्रीत्यविषयत्वेन आत्मनश्चादृश्यत्वेन त्रिविधा विक्षेपाभ्यो व्यावृत्तः एकाग्रहृदयं यस्य स विक्षेपैकाग्रहृदय इति मध्यमपदलोपी समासः॥ हि यिश फलजनकस्य जपादेः कर्मजपादेः प्रीत्यविषयत्वात् जपादिरूपो विरूपो मम नास्ति॥ आत्मनश्चादृश्यत्वाद् ध्यानविषयत्वाच्चिन्तारूपो पि विक्षेपो मम नास्तीत्यर्थः॥ एवमेव स्वस्वरूपे एवाहमास्थितः॥२॥ ननु तथापि समाध्यर्थे व्यवहारः कर्तव्य इत्याशंक्याह पाह॥ ध्यासादीति॥ कर्तृत्वाभिमानेन कृतो अनर्था ध्यासादिभिर्विक्षिप्तो सत्यां नेतरासार्थं समाधये व्यवहारो नान्यथेति नियमं विलोक्य शुद्धात्मज्ञानिना मध्यासाभावादेवमेव समाधिशून्य एवाहमास्थि

अष्टा०
२२

हेयेति॥ पूर्णात्मदर्शिनो मम हेयोपादेयवस्त्वनोर्विरहात् एवमस्मात्प्रकारेण हर्षविषादयो
रभावात् हे ब्रह्मन् गुरो — — अधुनाहमेवास्थितः॥७॥ आश्रमेति॥ आश्रमानाश्रमं
ध्यानं चित्तस्वीकृतं चित्तवर्जनं विकल्पं मम विकल्पसंकल्पविकल्प
वीक्ष्य एतैरेवमेव नानाविधैर्विरहितत्वादेवमेवास्थितः॥५॥ कर्मेति॥ यथैव कर्मानुष्ठानमज्ञा
नात्तथैवोपरमः कर्मोपरमोऽपि अज्ञानादेव इदं सम्यक् यथार्थतो बुध्वाहमेवमेव कर्मतु

हेयोपादेयविरहादेवं हर्षविषादयोः। अभावादद्य हे ब्रह्मन्नेवमेवाहमास्थितः॥४॥
आश्रमानाश्रमं ध्यानं चित्तस्वीकृतवर्जनं॥ विकल्पं मम वीक्ष्यैतैरेवमेवाहमास्थितः॥५॥
कर्मानुष्ठानमज्ञानाद्यथैवोपरमस्तथा॥ बुध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः॥६॥
अचिन्त्यं चिन्त्यमानोऽपि चिन्तारूपं भजत्यसौ॥ त्यक्त्वा तद्भावनं तस्मादेवमेवाहमास्थितः॥७॥
एवमेव कृतं येन स कृतार्थो भवेदसौ॥ एवमेव स्वभावो यः स कृतार्थो भवेदसौ॥८॥
इत्येवमेवाष्टकं समाप्तं॥१२॥

परमरहितत्वादहमास्थितः॥६॥ अचिन्त्यमिति॥ अचिन्त्यं चिन्त्यमानोऽप्यसौ अचिन्त्यचिन्तानुरूपं
रूपं भजति तस्माद्धेतोः तद्भावनं त्यक्त्वा चिन्त्यं त्यक्त्वेति भावनात्यक्त्वाहमेवमेव भावनारहितः
स्थितः॥७॥ एवमेवेत्यवस्थायाः साधकोऽपि श्रेष्ठः सिद्धपुनस्तत्स्वभावस्तिको मुक्तिकन्या
यनाह॥ एवमेवेति॥ येन एवमेव सर्वक्रियारहितमेव स्वस्वरूपसाधनं वशात्कृतं सोऽसौ
कृतार्थो भवेत्॥ यः पुनः एवमेव स्वभावः ज्ञानस्तोऽसौ कृतार्थो भवतीति किं वक्तव्यमित्यर्थः
॥८॥ इति श्रीमदष्टावक्रविरचितायामष्टावक्रटीकायां एवमेवाष्टकं समाप्तं॥१२॥

२२

43

55

मनः कुत्रापि तन्नित्यत्वात् पुरुषार्थस्थितं सुखं ॥२॥

...त्यमेवेत्यवस्थायाः फलीभूताः सुखस्थितिः ॥ प्रा..शिष्यः स्फुटीकर्तुं सन्मासे यथा सुखं ॥१॥ ... यथैवमवेत्यवस्थायाः फलीभूतं सुखस्यावस्थानं स्वकीयां विशद ... मा... त्यागात्...न विरत्या ॥ ... किंचन न भवेत् सर्वत्यागाभावप्रसंगः स्यात् ... चेत् तत्र ... यः कौपीनं त्वेपि कौपीनमपि ... कोपि कुर्वे ... स्मात्कारणात् अहं न कदाचित् ... स्पर्धाः त्यागात् ... योगः ... विरत्या यथा सुखं सुखमननं ... मासे ॥१॥ कुत्रापीति ॥ कुत्रापि शरीरकर्मणी कायस्य खेदः कुत्रापि वाचिककर्मणी जिह्वा खिद्यति कुत्रापि ध्यानादिकर्मणी मनः खिद्यति ॥

...किंचन भवेत्स्वास्थ्यं कौपीनत्वेपि कुर्वे मं ॥ त्यागादप्ने विहाय ... मासे यथा सुखं ॥१॥ कुत्रापि खेदः कायस्य जिह्वा कुत्रापि खिद्यति ... मासे यथा सुखं ॥२॥ ... कृते किमपि नैवस्थादिति संचिंत्य तत्त्वतः ॥

कर्मनैष्कर्म्यनिर्बंधभावा देहस्थयोगिनः ॥ संयोगायोगविरहादहमासे यथा सुखं ॥३॥

... इति त्रितय ... सुखं यथा स्यात्तथा पुरुषार्थस्वात्मन्येवास्थितः ॥ ... कायवाङ्मनो व्यापारत्यागेऽपि ... देहस्थः ... भोजनादेरपि ... त्यागादि शंक... ॥ कृतमिति ॥ शरीरेंद्रियादिभिः कृतं किमपि तत्त्वतः ... नास्त्यादिति संचिंत्य ... रागादिकर्म ... माश्रित्य ... यथा सुखमासे ॥३॥ ननु कर्मवानैःकर्म्य ... निष्ठावशेप ... पुरुषार्थस्थितं त्याज्यं स्यात् ॥ कर्मेति ॥ कर्मनैःकर्मनिर्बंधः ... भावः देहस्थयोगिनः ... योगवियोगादपि यथा सुखमासे ... ॥

... कर्मनैः कर्मनिर्बंधस्य प्रश्नः ॥४॥

(54)

अष्टा०
२३

अथ लौकिकव्या[illegible]रेपि मम मनोनिर्वंधइत्यपास्य ॥ अथेति ॥ ममास्थित्यादिनास्याध्येयः ॥ अर्था
नर्थौ नस्तः पूर्णात्मदर्शि[illegible]त्वात् ॥ तस्मादेनासेन्नयानिष्ठन्नगच्छन्स्वपन्नत्वाऽहं य
थासुखमासे ॥५॥ तत्रैव भंगीतरंगेण ॥ स्वपत इति ॥ स्वपतो यत्नेरहितस्य मे
मम हानिर्नास्ति ॥ यत्नवतश्च मम सिद्धिर्नास्ति ॥ अस्मात्कारणात् ॥ यत्नायत्नयोर्नाशो

अर्थानर्थौ न मे स्थित्या गत्या वा शयनेन वा ॥ तिष्ठन्गच्छन्स्वपंस्तस्मादहमासे
यथासुखं ॥५॥ स्वपतो नास्ति मे हानिः सिद्धिर्यत्नवतो न वा ॥ नाशोल्लासौ विहायास्मा
दहमासे यथासुखं ॥६॥ सुखादिरूपानियमं भावेष्वालोक्य भूरिशः ॥ शुभाशुभे
विहायास्मादहमासे यथासुखं ॥७॥ इति यथासुखसप्तकं ॥१३॥

ल्लासौ विहायाहं यथासुखमासे ॥६॥ सुखादीति ॥ भावेषु पदार्थेषु सुखादिरू
पानियमं सुखदुःखादिधर्माणामनित्यत्वं भूरिशो बहुशो लोक्य ॥ अस्मा
त्सुखाद्यनित्यत्वदर्शनाद्धेतोरहं यथासुखमासे ॥७॥ इति श्रीमद्विश्वेश्वर
विरचितायामष्टावक्रटीकायां यथासुखसप्तकं ॥१३॥०॥

२३

45

(९८)

ऊरिदीनां सुखावस्थां समर्थाधित्नु मात्मनि॥ अथ शिष्यः समावस्थां चतुःश्लोकैराह गुरुं प्रति॥१॥
पूर्वं तु गुरुणा उपशमाष्टकमुक्तं सांप्रतं तु शिष्यः स्वसुखावस्थासमर्थमात्मनः समावस्थामा
ह॥ प्रकृत्येति॥ प्रकृत्या स्वभावेन विषयेषु शून्यचित्तः प्रमादादबुद्धिपूर्वकं भावं शब्दा
दीन् विषयान् भावयति चिन्तयतीति भावभावनः कश्चन निद्रितो बोधित इव यथा निद्रा
वशात् शून्यचित्तः केनचन बोधितस्तथा प्रमादाद्भावभावनः एवंविधो यः पुमान् विषयेषु शून्य
चित्तः स हि निश्चयेन क्षीणसंसरणः संसारहेतुविषयानुस्मरण[illegible]पिकादिसंसृतिः॥१॥

प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः॥ निद्रितो बोधित इव क्षीणसंसरणो हि सः॥१॥
क्व धनानि क्व मित्राणि क्व मे विषयदस्यवः॥ क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृहा॥२॥
विज्ञाते साक्षिपुरुषे परमात्मनि चेश्वरे॥ नैराश्ये बंधमोक्षे च न चिन्ता मुक्तये मम॥३॥ अन्तर्वि
कल्पशून्यस्य बहिः स्वच्छन्दचारिणः॥ भ्रान्तस्येव दशास्तास्तास्तादृशा एव जानते॥४॥ इति मूलं

क्व धनानीति॥ विषयभावनाशून्यस्य पूर्णस्य मद्विधस्य यदा स्पृहा विषयेच्छा गलिता नष्टा तदा मम
धनानि क्व विषयरूपा दस्यवः चौराः क्व शास्त्रं क्व च विज्ञानं अहं ब्रह्मास्मीति निदिध्यासनं च क्व
मादि विज्ञानं तेषामपि समावस्थानाशात् इत्यर्थः॥२॥ विज्ञात इति॥ देहेन्द्रियादीनां साक्षिपुरुषे स्वंपद
र्थे परमात्मनि चेश्वरे तत्पदार्थे विज्ञाते साक्षात् अहमस्मीति साक्षात्कृते सति निर्मुक्तचिद्रूपात्मनः
भावात् बंधमोक्षे अपि नैराश्ये सति मम मुक्त्यर्थं न चिन्ता॥३॥ ननु समाधानस्य भावः कः कथं ज्ञायत इत्या
शंक्याह॥ अन्तर्विकल्पेति॥ अन्तःकरणे विकल्पशून्यस्य बहिः भ्रान्तस्येव स्वच्छन्दचारिणः ज्ञानिनो या
स्तास्तादृशा एव ज्ञानिन एव जानन्ते॥४॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां

(45)

अष्टा० २४

दुर्लक्ष्यमात्मतत्त्वं प्रत्याययितुमसमर्थमाशंक्य तत्त्वोपदेशार्थं गुरुराह द्वयोर्द्वि ॥१॥ यद्यपि इत्थ मात्मतत्त्वोपदेशः कृतस्तथापि तत्र त्वं लयमर्तव्य वासिष्यः पुनः कृपदेशं कुर्वं दुर्लक्षत्वात्तद था शिष्याणामपि निष्पद्यते न वा सत्त्वः केषांचिदेव प्रतीत्या चार्थ्य शिष्यार्थं ममकृत त्वं मोपदेशः कृतार्थतायोग्यतानधिकारिणो न त्वधिकारी तमेवाह ॥ यथा यथेति ॥ सत्त्वबुद्धिमान् शिष्यो यथातथा यावता तेनाप्युपदेशेन कृतार्थः स्यात् कृतात्मेव कृतयुगे प्रबलवत्ताप देशाद्यवि शिष्यः कृतार्थो विमूढः परः आसत्त्वबुद्धिः यावज्जीवं जिज्ञासुरपि वक्तोपदिष्टोपि विमूढ

यथातथोपदेशेन कृतार्थः सत्त्वबुद्धिमान् ॥ आजीवमपि जिज्ञासुः परस्तत्र विमुह्यति ॥१॥ मोक्षो विषयवैरस्यं बंधो वैषयिको रसः । एतावदेव विज्ञानं यथेच्छसि तथा कुरु ॥२॥ वाग्मिप्राज्ञमहोद्योगं जनं मूकं जडालसं । करोति तत्त्वबोधोयमतस्त्यक्तो बुभुक्षुभिः ॥३॥

ति यथा विरोचनो ब्रह्मणा वक्तोपदिष्टोपि मुमोहेत्यर्थः ॥१॥ पथ बंधमोक्षौ सुखेनोपाय न संग्रहेण निरूपयति ॥ मोक्ष इति ॥ विषये शब्दरसाभाव एव मोक्षः विषये स्त्रीन रागरूप बंधस्त र्थः । एतावदेव तत्त्वं धर्माधर्मं ज्ञात्वा चरत्वं यथेच्छसि तथा कुरु ॥२॥ इदं तु विषयवैरस्यं तत्त्वबो धसाधनार्थं शिष्यान् बोधयति ॥ वाग्मीति ॥ प्रसिद्धिः अयमतत्त्वबोधः वाग्मिनं वक्तारं स्वायमालो मूकं करोति प्राज्ञं नानाविशेषवेदिनं जडं करोति महोद्योगं नानाक्रियानुष्ठानशालिनं अलस मकर्मिणं निःस्पृहं मनसा प्रत्यक्प्रवणतया बाह्यव्यापाररहितं भवति तस्मात् हेतोः भवतीत्यर्थः । अतोयं तत्त्वबोधः वाग्मिप्रभृतीन् करोतीति अतो हेतोः भोगेच्छुभिः त्यक्तः अनादृत इत्यर्थः ॥३॥

२४

47

तत्त्वबोधयति स्वार्थमुपदिशति॥ न त्वमिति॥ त्वं देहादिरूपो न भवसि यतश्चिद्रूपोऽसि न ते नो
वा देहसंबंधः कुतः असंगो ह्ययं पुरुष इति श्रुतेः। न वा भवान् कर्ता भोक्ता यतः कर्तृभोक्तृत्वे
साक्षी सदा साक्षी सततं निःसंगः यथा घटसाक्षी घटादिभिन्न इत्यर्थः। एवं त्वं देहेन ते संबंधरहित
सन् सुखं विचरेत्यर्थः॥४॥ ननु रूपे तत्त्वमुपपादितमात्मा रागेति॥ रागद्वेषौ मनोधर्मौ न त्वं
धर्मौ मनसः कदाचिदपि न तव संबंधिनौ भवतः। एवं त्वं ध्यात्वा रागाद्यध्यासे मा कुरु इत्यर्थः।
ननु रागद्वेषौ मनोधर्मौ कथं न स्यात् निर्विकल्पेति। यतस्त्वं निर्विकल्पः बोधात्मा च

न त्वं देहो न ते देहो भोक्ता कर्ता न वा भवान्॥ चिद्रूपोऽसि सदा साक्षी निरपेक्षः सुखं चर॥४॥
रागद्वेषौ मनोधर्मौ न मनस्ते कदाचन॥ निर्विकल्पोऽसि बोधात्मा निर्विकारः सुखं चर॥५॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि॥ विज्ञाय निरहंकारो निर्ममस्त्वं सुखी भव॥६॥
विश्वं स्फुरति यत्रेदं तरंगा इव सागरे॥ तत्त्वमेव न सन्देहश्चिन्मूर्ते विज्वरो भव॥७॥

सन्नतो रागादिविकाररहितः सन् सुखं चरेत्यर्थः॥५॥ सर्वेति॥ सर्वभूतेषु कारणत्वेनानु-
स्यूतमात्मानं विज्ञाय विभाव्य सर्वभूतानि अध्यस्तानीति विभाव्य अहंकारादेः सर्वस्यात्मभूते-
मेव स्फुरणात् देहे ममाभिमानरहितस्त्वं सुखी भव॥६॥ सर्वभूतानि चात्मनि स्थितानि तद्विशदयति
विश्वमिति॥ यत्र इदं विश्वं सागरे तरंगा इवाधिष्ठानाभिन्नत्वेन स्फुरति तत्त्वमेव पुनः कारणात्
चिन्मूर्ते विज्वरो भव चिन्मात्रमूर्ते यतस्त्वं भवान् अतः सर्वसन्तापरहितो भवेत्यर्थः॥७॥ एवं प्रकार-
ान्तरेण पुनः पुनर्बोधयति॥ आयस्येति॥ ०॥

58

अहं स त्वात न शुद्धस्य प्रविद्रूपनायां स्नेहेन नाविपरीतभावना रूपं न कृपम्रष्टाश्रेष्ट
के विरादयामि। जोन नि॥ ज्ञानस्वरूपः प्रकृतेः परस्त्वं कीदृशस्त्वं भगवान् तत्पदार्थः त
था आत्मा त्वंपदार्थः॥९॥ गुणैरिति॥ गुणैरिंद्रियादिभिः संवेष्टितो देहः इहलोके ति
ष्ठति॥ तथा आयाति॥ तथा किंचित्कालं याति संगच्छति। देहादिभिन्नः आत्मा तु न गं
ता नागंता न जाता नागंता इत्यारिस्मानि इत्येवमेनं किं शोचसि॥

आत्मा न गच्छति नागंता किमेनमनुशोचसि॥ ज्ञानस्वरूपो भगवानात्मा त्वं प्रकृतेः
परः॥९॥ गुणैः संवेष्टितो देहस्तिष्ठत्यायाति याति च॥ आत्मा न गंता नागंता किमेन
मनुशोचसि॥ देहस्तिष्ठतु कल्पांतं गच्छत्वद्यैव वा पुनः॥ क्व वृद्धिः क्व च हानिस्ते
तव चिन्मात्ररूपिणः॥१०॥ त्वय्यनंतमहांभोधौ विश्ववीचिः स्वभावतः॥ उदे
तु वास्तमायातु न ते वृद्धिर्न वा क्षतिः॥११॥

देहस्य मैः आत्मा नेमाश्चचरस्यार्थः॥ देह॥ नापि देहस्थितिप्रकोनिष्पानवत् वृद्धिहानी स्यातां
देहइति॥ नित्यचिन्मात्ररूपिणस्तव देहस्थित्यानवृद्धिर्न च हानिरित्यर्थः॥१०॥
त्वयीति॥ विश्वास्या वीचिरपि त्वय्यनंते चित्समुद्रे उदेतु अथवास्तमायतु तत्र ते
नापि ते न वृद्धिर्न वा हानिः॥ तवानंतत्वादित्यर्थः॥११॥

तातेति। सर्वस्य त्वद्भिन्नत्वान्न हेय उपादेयं वा कथं केन वा प्रकारेण हेयमुपादेयं कुत्र वा
उपादेयमित्यर्थः॥१२॥ एकस्मिन्निति। एकस्मिन् सजातीयविजातीयस्वगतभेदशून्ये
ऽव्यये शान्ते स्वकार्यशून्ये चिदाकाशे निर्मले च सर्वोपाधिशून्ये च त्वयि कुतो जन्म कुतः
कर्म कुतश्चाहंकारः द्वितीयस्य हेतोरभावात्। अव्ययस्य च जन्मासंभावात्। कार्यशून्य
स्य च कर्म कुतः कर्तृत्वासंभावात्। निर्मलस्याहंकारासंभावादित्यर्थः॥१३॥

तात चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत्। अतः कस्य कथं कुत्र हेयोपादेयकल्पना॥१२॥
एकस्मिन्नव्यये शान्ते चिदाकाशेऽमले त्वयि। कुतो जन्म कुतः कर्म कुतोऽहंकार एव च॥१३॥
यत्त्वं पश्यसि तत्रैकस्त्वमेकः प्रतिभाससे। किं पृथग्भासते स्वर्णात्कटकाङ्गदनूपुरम्॥१४॥
अयं सोऽहमयं नाहं विभागमिति संत्यज। सर्वमात्मेति निश्चित्य निःसंकल्पः सुखी भव॥१५॥
तवैवाज्ञानतो विश्वं त्वमेकः परमार्थतः। त्वत्तोऽन्यो नास्ति संसारी नासंसारी च कश्चन॥१६॥

एकत्वमुपपादयति। यत्त्वमिति॥ यद्यत्कार्यं त्वं पश्यसि तत्र कारणरूपस्त्वमेवैकः प्र-
तिभाससे कटकाङ्गदादौ स्वर्णवदित्यर्थः॥१४॥ अयं सोऽहमिति। कारणरूपत्वात्त्वमेव सर्वमि-
ति निश्चित्यात्मभेदं त्यज। तथा च निर्विकल्पो विगतनानात्वप्रतिभासः सन् सुखी भव द्विती-
यप्रतिभावनाद्दुःखं भवतीत्यर्थः॥१५॥ विभागत्यागे युक्तिमाह। तवैवेति। तवैवाज्ञानतो
विश्वं विश्वाकारेणाविक्षेपः। अतः परमार्थतस्त्वमेकः। अतः संसारी असंसारी च त्वत्तो नान्यः
कश्चिदित्यर्थः॥१६॥

भ्रांतिमात्रमिदं इदं विश्वं भ्रांतिमात्रं सिद्धं अतो हेतोर्न किंचित् पृथक् सत्तास्तीति मत्यर्थः
इति निश्चयी अतः एव सर्वस्य निरस्तत्वात् निर्वासनः स्फूर्तिमात्रो वासनारहितः स्फूर्तिमात्रः
सन् न किंचिदिव निरस्ताशेषविशेषः सन् शाम्यति॥१७॥ एक एवेति। कालत्रयेऽपि भवा-
म्भो[illegible]धौ एकस्त्वमेवासन् त्वं बंधमोक्षौ न स्तः अतस्त्वं कृतकृत्यः सन् सुखं चर॥१८॥
मा संकल्पेति॥ ०॥ हे चिन्मय त्वं संकल्पविकल्पाभ्यां चित्तं मा क्षोभय॥

भ्रांतिमात्रमिदं विश्वं न किंचिदिति निश्चयी॥ निर्वासनः स्फूर्तिमात्रे न किंचि-
दिव शाम्यति॥१७॥ एक एव भवांभोधावासीदस्ति भविष्यति॥ न ते बंधोऽस्ति मो-
क्षो वा कृतकृत्यः सुखं चर॥१८॥ मा संकल्पविकल्पाभ्यां चित्तं क्षोभय चिन्मय॥ उ-
पशाम्य सुखं तिष्ठ स्वात्मन्यानंदविग्रहे॥१९॥ त्यजैव ध्यानं सर्वत्र मा किंचिद्धृदि धारय॥
आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि॥२०॥ इति तत्त्वोपदेशविंशतिकं समाप्तं॥
॥१५॥

उपशाम्य उपरतसंकल्पविकल्पो भव। आनंदरूपे स्वात्मनि सुखं तिष्ठ॥१९॥ ध्यानमपि
त्यजेत्याह॥ त्यजेति। सर्वत्र ध्यानं त्यज कुत्रापि ध्याने मा कर्षीरित्यर्थः। एतदेव विशदयति
मा किंचिद्धृदि धारयेति मननमपि त्यजेत्याह। आत्मेति। आत्मा त्वं सदा मुक्त एवासि अ-
तो विमृश्य विचार्य किं फलं करिष्यसि नित्यमुक्तत्वादित्यर्थः॥२०॥ ॥इति श्रीमद्वि-
श्वेश्वरविरचितायामष्टावक्रटीकायां तत्त्वोपदेशविंशतिकं समाप्तं॥१५॥

सु॰ब्रा॰
२७

योऽकर्मतो निमेषोन्मेषयोरपि व्यापारे खिद्यते। कृपेनासक्तो भवति तस्य एवालस्यधुरीण
स्य क्रियाभिनिवेशरहितस्य सुखं नान्यस्य इत्यर्थः॥४॥ क्रियानिमित्ते शाखकस्य सर्व
तु हेप्या विलये सति द्वन्द्वनिरपि भवतीति सूचन्नाह॥ इदं कृतमिति॥ इदं कृतमिदं नेत्याद्य
द्वन्द्वैर्मुक्तं यदा मनो भवति तदा पुरुषार्थचतुष्टयेपि निरपेक्षं भवेत् ह्वालीनस्य जीवन्मुक्त
स्येत्यर्थः॥५॥ पुरुषार्थकामनानिरपेक्षस्य विरक्तो मुक्तो भ्यो विलक्षणतामाह। विरक्त इति
मुमुक्षुः सन्नये विषे — — — विरक्तः कथ्यते॥

व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि। तस्यालस्यधुरीणस्य सुखं नान्यस्य कस्य
चित्॥४॥ इदं कृतमिदं नेति द्वन्द्वैर्मुक्तं यदा मनः। धर्मार्थकाममोक्षेषु निरपेक्षं तदा भवेत्॥५॥
विरक्तो विषयद्वेष्टा रागी विषयलोलुपः। ग्रहमोक्षविहीनस्तु न विरक्तो न रागवान्॥६॥
हेयोपादेयता तावत्संसारविटपांकुरः। स्पृहा जीवति यावद्वै निर्विचारदशास्पदम्॥७॥

कामसापेक्षः सन् यो विषयलोलुपः स रागीति कथ्यते यस्तु ग्रहमोक्षविहीनः ग्रहमोक्षौ
भ्यां विहीनः विरक्तो रक्तो भ्यां विलक्षणः सर्वतो निरपेक्षस्तया हानोपादानेच्छारहितत्वादित्य
र्थः॥६॥ नन्वज्ञानिनोपि हानोपादानादिव्यवहारो दृश्यते तेषु कथम्। हेयोपादेयतेति॥७॥ ३
निर्विचारदशास्पदमविवेकदशामयीभूतस्पृहा तृष्णा जीवति तावत्पर्यन्तमेव हेयो
पादेयता हानोपादानादिव्यवहारः संसारवृक्षस्य सारकांकुरो भवति। ज्ञानिनां तु स्पृ
हाभावात्तेष्वपि हानादिव्यवहारे संसारसारकाप्रसरो न भवतीत्यर्थः॥७॥ २७

पृथक्सत्वेनसर्वस्यविस्मृतिर्मुक्तिसाधनं।तस्मादनर्थविच्छेदकाभेदेत्यत्रवर्ण्यते॥१॥स्वेनेनेनसर्वप्रपंचस्यपृथक्सत्तयाविस्मरणंकारित्वैवतृष्णापापादिवारामुक्तिर्नान्यथेतिविशेषमनुपदिशति॥आचक्ष्वेति॥हेतातत्वंनानाशास्त्राणिअनेकशःआनेकवारंशिष्यभ्यः।आचक्ष्व गुरुभ्यः शृणु वा तथापि न तव सर्वविस्मरणादृते स्वास्थ्यं श्रेयो नास्तीत्यर्थः।सुषुप्तौ तु यद्यपि विषयविस्मरणमस्ति तथाप्यज्ञानविस्मरणं नास्तीति भावः।जीवन्मुक्तेस्य तु सर्वस्याध्यासस्य तत्त्वानुसंधानरूपविस्मरणमस्तीति भावः॥१॥

आचक्ष्व शृणु वा तात नानाशास्त्राण्यनेकशः। तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते॥१॥
भोगं कर्म समाधिं वा कुरु विज्ञ तथापि ते। चित्तं निरस्तसर्वाशमत्यर्थं रोचयिष्यति॥२॥
आयासात्सकलो दुःखी नैनं जानाति कश्चन। अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृतिं॥३॥

सर्वविस्मरणेति॥सर्वस्वरूपं वीक्ष्य चित्तं निरस्तसर्वाशं भवतीति सूचयन्नाह॥भोगमिति॥हे विज्ञ त्वं भोगं सुकृतं कर्म वा कुरु समाधिं वा कुरु तथापि ते चित्तं प्रत्यर्थं रोचयिष्यति स्वरूपे सच्चिन्मयादपि प्रियतो कीदृशं चित्तं निरस्तसर्वाशं सर्वविस्मरणे सति सर्वाशात्यागादित्यर्थः॥२॥सर्वतृष्णाविलये सति तत्त्वज्ञानेनापि कर्मणो दुःखहेतुरायासो न भवतीति सूचयन्नाह॥आयासादिति॥सकलो जनः आयासादेव दुःखी भवति परंतु कश्चन एनं आयासं न जानाति दुःखहेतुरयमिति न वेत्ति।अनेनैवेति।आयासात्सकलो दुःखीत्यनेनैवोपदेशेन धन्यः सुकृती निर्वृतिं परमं सुखं प्राप्नोति॥३॥ व्यापारान्नास्ति सुखहेतुरित्याह॥

अ०गी० २८

रूपं यथा तत्र श्लोकविंशत्या तत्त्वज्ञस्यैकदेशो व्याख्यातः । विषयात्तत्त्वज्ञस्य सकर्षस्य व्याख्यायेन गुरु[illegible] ॥ यथा
विषयाणामपि विषयाणां प्रवृत्त्यर्थं तत्त्वज्ञानफलं व्याख्यातुं वदत्यात्तत्त्वदशां गुरुर्निरूपयति । तेनेति ॥
तेनैव ज्ञानफलं प्राप्तं यः प्राप्तत्वान्यवन्नृज्ञाने भोगादिना [illegible] तृप्तः स्वच्छेन्द्रियो विषयानासक्तेन्द्रियः स
न्नेकाकी विषयसंयोगविनैव नित्यं तत्र स्वात्मन्येव रमते ॥१॥ न कदाचिदिति । तत्त्वज्ञः सहर्षसंकोचने हे
त्वाभावात् अस्मिन् जगति कदाचिदपि तत्त्वज्ञो न खिद्यते यत एकेनैव तेनेदं ब्रह्माण्डमण्डलं पूर्णं व्याप्तं ॥

तेन ज्ञानफलं प्राप्तं योगाभ्यासफलं तथा ॥ तृप्तः स्वच्छेन्द्रियो नित्यमेकाकी रमते तु यः ॥१॥
न कदाचिज्जगत्यस्मिंस्तत्त्वज्ञो हन्त खिद्यति । यत एकेन तेनेदं पूर्णं ब्रह्माण्डमण्डलं ॥२॥
न जातु विषयाः केऽपि स्वारामं हर्षयन्त्यमी ॥ सल्लकीपल्लवप्रीतमिवेभं निम्बपल्लवाः ॥३॥
यस्तु भोगेषु भुक्तेषु न भवत्यधिवासितः । अभोगेष्वनिराकांक्षी तादृशो भवदुर्लभः ॥४॥

यतो द्वितीयस्याभावान्न खिद्यतीत्यर्थः ॥२॥ न जात्विति ॥ स्वस्मिन्नात्मन्येव रमते तं स्वा
रामं जातु कदाचिदप्यमी विषया न हर्षयन्ति तत्र दृष्टान्तः यथा सल्लकीपल्लवप्रीतं इभं गजं नि
म्बपल्लवा न हर्षयन्ति कटुकत्वादित्यर्थः ॥३॥ यस्त्विति ॥ यस्तु भुक्तेषु भोगेषु भोगासक्तिं न भव
ति अभुक्तेषु आकांक्षावान् न भवति तादृशो जनस्तत्त्वज्ञो भवदुर्लभः संसारसागरे कोऽपि दुर्लभ
इत्यर्थः ॥४॥ [illegible] ॥

२८

(54)

प्रवृत्तावि॰ति॥ प्रवृत्तौ सत्यां रागः प्रवृत्तौ सत्यां पुनरसौ नरः विषयेषु रागो जायते विषयेपि द्वेषः पूर्व कनिवृत्तौ सत्यां पुनरसौ नरः विषयद्वेषः एव हि जायते ततो धीमान् ज्ञानी बालवत् तत्त्वज्ञात्वा नुसाधने रहितः निर्द्वंद्वः रागद्वेषरहितः सन् एवमेव रागजन्य निर्द्वेषजन्य निवृत्ति रहितत्वा वास्थितः। केवलमारब्धवशात् देवके प्रवृत्तिनिवृत्ति कदाचित् प्रवर्तते च न तु रागद्वेष वश इत्यर्थः॥९॥ हातुमिच्छतीति॥ यस्त्वरागी सः दुःखजिहासया संसारं हातुमिच्छति॥ वीतरागी

प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि॥ निर्द्वंद्वः बालवद्धीमानेवमेव व्यवस्थितः॥८॥ हातुमिच्छति संसारं रागी दुःखजिहासया॥ वीतरागो हि निर्दुःखस्तस्मिन्नपि न खिद्यति॥९॥ यस्याभिमानो मोक्षेपि देहेपि ममता तथा॥ न च ज्ञानी न वा योगी केवलं दुःखभागसौ॥१०॥ हरो यद्युपदेष्टा ते हरिः कमलजोपि वा॥ तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते॥११॥

इति श्री अष्टावक्र विशेषोपदेश प्रकरणं समाप्तं॥१६॥

सन् निर्दुःखः रागोपि दुःखरहितत्वात् तस्मिन् संसारे सत्यपि न खिद्यति खेदं न प्राप्नोति॥ प्र सत्यतं ज्ञानी त्रिकालवृत्तौ तदर्शी मुक्त इत्येवं यस्य मोक्षेप्यभिमानो नासौ ज्ञानी तथा देहे योगा भ्यासादिना स्वैच्छया धर्माधर्म मतः मम देहो वक्ता न च अपवसादि समर्थ देहे देहेप्यभिमा नो नासौ योगी न वा ज्ञानी केवलमसौ दुःखभाक् दुःखहेतुत्वं हं ममाभिमानाभि निवृत्ते स्थित्यर्थः॥१०॥ सर्वविस्मरणोपदेशमुपसंहरति॥ हर इति॥११॥ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां

अष्टा०
२८

शून्येति। क्षीणः संसारसागरो यस्य तस्मिन् क्षीणसंसारसागरे पुरुषे स्पृहा विषयेच्छापि न विर
क्तिर्वा विषयविरक्तिश्च न तस्य मनः कार्येन्द्रियव्यापारो वा लोकमनादिवदित्याह। शून्येति। तस्य
दृष्टिर्मनोव्यापारः शून्यः संकल्पविकल्परहितः चेष्टा कायव्यापारः वृथा [illegible] मनुद्दिश्यैव
तस्येन्द्रियाणि विकलानि पुरःस्थितानामपि विषयाणां ग्रहणे [illegible] त्वान्न न [illegible] यस्यां
जाग्रति भूतानि सा निशा पश्यतो मुनेरिति। [illegible] न जागर्तीति। जानाति [illegible]
स्वस्थावान्न वर्तते। अत एव बहिर्विषयाननुसंधानादिति हेतुमाह। नोन्मीलतीति। बाह्य

शून्या दृष्टिर्वृथा चेष्टा विकलानीन्द्रियाणि च॥ न स्पृहा न विरक्तिर्वा क्षीणसंसार
सागरे॥ ९॥ न जागर्ति न निद्राति नोन्मीलति न मीलति॥ अहो परदशा क्वापि वर्तते
मुक्तचेतसः॥ १०॥ सर्वत्र दृश्यते स्वस्थः सर्वत्र विमलाशयः॥ समस्तवासना
मुक्तो मुक्तः सर्वत्र राजते॥ ११॥

विषयाननुसंधत्ते इत्यर्थः। तथा तानि नेत्राणि निद्राति यतः न निमीलतीति जडोन्मत्तवत्
तदन्यथा सर्वान् विषयान् [illegible] पश्यतीत्यतः कोऽपि हि [illegible] अहो इति। अ
हो इति प्राश्चर्ये मुक्तचेतसः क्वापि [illegible] लौकिकी परदशा उन्मत्तवदवस्था [illegible] यातीत्यर्थः॥ १०॥
इदमेव विशदयति। सर्वत्रेति। सर्वत्र सुखदुःखेषु स्वस्थ [illegible] चित्तः तथा सर्वत्रैव [illegible] मित्रेषु वि
मलाशयः समानदर्शी। यतः समस्तविषयवासनाभ्यो मुक्तः। अत एव मुक्तः सर्वत्र सर्वाद्दि
दशासु राजते दीप्यति। [illegible] त्वदर्शितात्॥ ११॥

२८
56

संसारे बुभुक्षुमुमुक्षुभ्यामनेकधा दृश्यते भोगमोक्षनिराकांक्षी महाशयः पुरुषो विरल इत्याह ॥ आशयो ऽन्तःकरणं यस्य स महाशयः विरलः यतः तम् अपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इति भगवद्वचनात् ॥४॥ धर्मार्थेति ॥ प्रकाशार्थचतुष्टये तथा जीविते मरणे या योग्यताऽयोग्यता हेयोपादेयता नास्ति तेन विरल इत्यर्थः ॥५॥

वांछेति ॥ यस्मात् ज्ञानिनो विश्वविलये प्रपंचोपरमे वांछा नास्ति तस्य प्रपंचस्य स्थितौ च द्वेषो नास्ति ।

उद्भूतः [illegible] संसारे मुमुक्षुरपि दृश्यते । भोगमोक्षनिराकांक्षी विरलो हि महाशयः ॥४॥
धर्मार्थकाममोक्षेषु जीविते मरणे तथा ॥ कस्याप्युदारचित्तस्य हेयोपादेयता न हि ॥५॥
वांछा न विश्वविलये न द्वेषस्तस्य च स्थितौ । यथा जीविकया तस्माद्धन्य आस्ते यथासु
खं ॥६॥ कृतार्थोऽनेन ज्ञानेनेत्येवं गलितधीः कृती । पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्ना
स्ते यथासुखं ॥७॥

[illegible] विज्ञानत्वेनैव स्फुरणात् तत्साक्षात्कारणात् धन्यो विद्वान् प्रारब्धवशात् प्राप्तया यथा
[illegible]या जीविकया सुखमनतिक्रम्यैवास्ते इत्यर्थः ॥६॥ कृतार्थ इति ॥ अहं अनेन ज्ञानेन [illegible]
[illegible] नेन कृतार्थो इत्येवं गलितधीः कृती दर्शनादिकं कुर्वन्नपि सुखमनतिक्रम्यास्ते कृतार्थः ।
[illegible] ध्येयः सत्वाद्वहिरिन्द्रियव्यापारे सत्यपि प्रज्ञानिविरलेव तस्य खेदो न भवतीत्यर्थः ॥८॥१०॥

57

82

पश्यन्ति ॥ प्रारब्धवशाद्दर्शनादिकं बहिरिन्द्रियव्यापारं कुर्वन्त्यपि इति तानीति नैरिच्छादै
वैमुक्तो महाशयो मरतिः आत्मनि निष्प्राशयो यस्य स महाशयो मुक्त एव मनोविकाराभावेन तत्त्वात् ॥१२॥
इदमेव विशदयति ॥ न निन्दतीति ॥१३॥ किंच सानुरागामिति सानुरागां स्त्रियं दृष्ट्वा यथावासमु
पस्थितं मृत्युं दृष्ट्वाऽविकृतमनाः ॥

पश्यन्नश्नन्नेव न स्पृशन्न जिघ्रन्नश्नन्न गृह्णन्न वदन्न व्रजन्नरस्तानीति नैर्मल्यो मुक्त एव
महाशयः ॥११॥ न निन्दति न च स्तौति न हृष्यति न कुप्यति ॥ न ददाति न गृह्णाति मुक्तः सर्वत्र
नीरसः ॥१२॥ सानुरागां स्त्रियं दृष्ट्वा मृत्युं वा समुपस्थितं ॥ अविकलमनाः स्वस्थो मुक्त एव म
हाशयः ॥१४॥ सुखे दुःखे नरे नार्यां संपत्सु च विपत्सु च ॥ विशेषो नैव धीरस्य सर्वत्र
समदर्शिनः ॥१५॥ न हिंसा नैव कारुण्यं नौद्धत्यं न च दीनता ॥ नाश्चर्यं नैव च
क्षोभः क्षीणसंसरणे नरे ॥१६॥ न मुक्तो विषयद्वेष्टा न वा विषयलोलुपः ॥ असंस
क्तमना नित्यं प्राप्ताप्राप्तमुपाश्नुते ॥१७॥

कामसमयाभ्यां विमुक्तमनाः महाशयो मुक्त एव ॥१३॥ किंच सुखे इति स्पष्टं ॥१५॥ न हिंसेति ॥
दां ॥ असंसरणे अनर्हे नाशाभिमानरहिते चिद्बुद्धिं तांनां अपरज्ञाने इत्यादयो मनोविका
रा न भवन्ति इत्यर्थः ॥१६॥ न मुक्त इति ॥ जीवन्मुक्तः विषयद्वेष्टापि न न वा विषयलोलुपः
किं तर्हि असंसक्तमनाः सन् प्रारब्धवशात्प्राप्ताप्राप्तमुपाश्नुते भुंक्ते इत्यर्थः ॥१७॥

समाधाने इति। विहितः शून्यचित्तो ज्ञानी समाधानादिविविधविकल्पान् न जानाति उत्प्रेक्षते इति विदेहकैवल्यं प्राप्त इव ॥१९॥ निर्मम इति। अहं ममाभिमानशून्यः स्वस्वरूपाद्धि अन्यत् नास्ति किञ्चिदिति निश्चयवान् अन्तर्गलितसर्वाशः [illegible] कुर्वन्नपि न करोति। कर्तृत्वाभिमानरहितत्वादित्यर्थः ॥१९॥

समाधानासमाधानहिताहितविकल्पनम्॥ शून्यचित्तो न जानाति कैवल्यमिव संस्थितः॥१९॥ निर्ममो निरहंकारो न किंचिदिति निश्चय। अन्तर्गलितसर्वाशः कुर्वन्नपि करोति न॥१९॥ मनःप्रकाशसंमोहस्वप्नजाड्यविवर्जितः। दशां कामपि संप्राप्तो भवेद्गलितमानसः॥२०॥ इति तत्त्वस्वरूपविंशतिकः। ॥१७॥

मन इति। गलितं सविशेषवृत्तिलीनं मनः यस्य स ज्ञानी कामपि अनिर्वाच्यां दशां संप्राप्तो भवेत् नन्दे तदर्शयति॥ मन इति॥ मनःप्रकाशविवर्जितो यतः सविशेषप्रकाशाभावात् तथा संमोहविवर्जितः स्वप्रकाशचित्त्वात् [illegible] स्वप्नविवर्जितो जाड्यस्य सुषुप्तो विवर्जित इत्यर्थः॥२०॥ इति श्रीम[illegible]विरचितायामष्टावक्र-

टीकायां तत्त्वस्वरूपविंशतिका॥ ॥१७॥

३०

59

तत्त्वमिति फलीभूतसमस्तैव प्रधानता। व्याख्यातं वर्ण्यते शांतिः शतश्लोकैः पुनः स्फुटं ॥१॥ तत्र तावच्छांतेः प्रधानत्वेन निरवद्यप्रयितुं फलभूतां शांतिं वर्णयितुकामः शांतिशीलं नमस्करोति ॥ यस्येति। यस्य बोधोदये सति तावत्तं कृत्स्नमेव प्रपंचात्मकः स्वप्नवत्तुच्छो यस्य ज्ञातो भवति तस्मै शांताय निवृत्तसंकल्पविकल्पाय अपरिमितसुखैकरूपाय दुःखानुविद्धवस्तुभावाय अपरिमिततेजसे स्वप्रकाशाय चिद्रूपाय नमः ॥१॥ ननु धनिनो विषयसुखिनो दृश्यंते कथं शांतसंकल्पा एव सुखैकरूपस्त्याशंक्याह ॥ उपार्जयित्वेति ॥ उपरि

यस्य बोधोदये तावत्स्वप्नवद्भवति भ्रमः ॥ तस्मै सुखैकरूपाय नमः शांताय तेजसे ॥१॥
उपार्जयित्वाखिलानर्थान्भोगान्प्राप्नोति पुष्कलान् । हि सर्वपरित्यागमंतरेण सुखी न
वेत्ता रावकर्त्तव्यदुःखमार्त्तंडज्वालादग्धांतरात्मनः । कुतः प्रशमपीयूषधारासारमृते सुखं ॥२॥

लानर्थान्धनधान्यकांतादीनर्जयित्वा पुष्कलान्बहुविधान्भोगान्प्राप्नोति न तु सुखैकरूपस्तत्र दुःखभाजित्वात् सर्वपरित्यागमंतरेण सर्वसंकल्पत्यागं विना सुखैकरूपो न भवेत् नैव स्यात् ॥ ननु संकल्पविकल्पयोस्त्यागः कथं तत्त्वज्ञानमेव त्यागमात्रस्य यथा बुध्या चित्रे शीलत्वज्ञानमेव त्यागः प्रसक्तः त्यागासंभवान् दुःखमेव फलमकालेऽकारणं विषादयति। कर्त्तव्येति। कर्त्तव्यानि यानि कर्माणि तज्जातिनानि दुःखान्येव मार्त्तंडज्वालास्तैरतः सूर्यतापसंतप्तेन दग्धो अंतरात्मनो मनो यस्य तस्य संकल्पप्रशमामृतधारासारं विना सुखं कुतः स्यात् ॥२॥

19

अष्टाव०
३१

संकल्पप्रशमस्यामृतत्वं संसाररूपविषनिवर्तकत्वादित्याशयेनाह। भवोयमिति। अयं भवः भावनामात्रः संकल्पमात्रप्रभवः परमार्थतस्तु आत्मव्यतिरिक्तं किंचिन्नास्ति परमार्थतस्तु आत्मैव भावरूपः न भवोयमिति। ननु अभावरूपोपि प्रपंचः कालादिवशान्नाशस्वभावस्तत्राशंक्याह। नास्तीति। भावाभावविभाविनां स्थितानां स्वभावानां अभावो नास्ति न हि उत्पन्नस्य भावस्य क्वचित् कदाचिदपि शीलस्य अभावो दृष्टः। तथा च मनोराज्यवद्भावनामात्रसिद्धोऽसत्स्वभावः प्रपंचो भावनानिवृत्तौ निवर्तते। इति संकल्पप्रशमनं संसारविषयतापापगमात् आत्मामृतत्वप्राप्तिहेतुत्वम् इति भावः॥ ननु संकल्पोपरममात्रेण कथमात्मामृतत्वप्राप्तिरित्याशंक्य तत्स्य नित्यप्राप्तत्वमाह।

भवोयं भावनामात्रो न किंचित्परमार्थतः॥ नास्त्यभावः स्वभावानां भावाभावविभाविनाम्॥४॥ न दूरं न च संकोचाल्लब्धमेवात्मनः पदम्॥ निर्विकल्पं निरायासं निर्विकारं निरंजनम्॥५॥ व्यामोहमात्रविरतौ स्वरूपादानमात्रतः॥ वीतशोका विराजंते निरावरणदृष्टयः॥६॥

स्वमाहात्म्यं न दूरमिति॥ आत्मनः पदं स्वरूपं दूरं नास्ति नापि संकोचात् अवच्छिन्नं परिच्छिन्नं नास्ति परिपूर्णत्वात् अत एव आत्मनः पदं नित्यलब्धं प्राप्तमेवास्ति संकल्पवशात् पुनरप्राप्तमिवाविद्यासमन्वितैः अज्ञानमोहितैः स्वरूपं दृश्यते अविद्याकृतत्वात् अविकल्पं निर्विकल्पं विकल्पातीतं आयासाभावात् अप्रयत्नलभ्यत्वान्निरायासं प्रत्यक्षत्वात् निर्विकारं विकारातीतं निरंजनं उपाधिमलस्पर्शरहितम्॥ कथं तर्हि तत्प्राप्तेनेनकथं ज्ञेयव्यवहारः शास्त्रकारैराचरित इत्याशंक्य भ्रांतिमात्रादित्याह। व्यामोहेति। ज्ञानेन व्यामोहस्य अविद्याकृतस्य विपर्ययस्य व्यामोहमात्रस्य प्रपंचभ्रांतिमात्रस्य विरतौ सत्यां स्वरूपादानमात्रतः आत्मावस्थानमात्रतो वीतशोकाः विराजंते सर्वदा स्वभावेनैव पूर्णानंदितत्स्वरूपाः।

नाराय०
३१

61

ज्ञानमात्रं सनातनश्चेत्यर्थः। समस्तमिति सूत्रार्थमिदं॥७॥ समस्तं कल्पनामात्रमिति ज्ञान
स्य निदानभूतं तत्त्वंपदार्थं ज्ञानमात्रम्। आत्मेति। आत्मा त्वंपदार्थः। ब्रह्म तत्पदार्था
भिन्नं इति निश्चित्य अधिष्ठानसाक्षात्काराद्भावाभावौ घटादितदभावौ कल्पिताविति
निश्चित्य तथा च सर्वस्य तत्त्वज्ञानानुसंधानात्कामहेतुविषयाविलयाच्च निःकामः सन्
किं विशिष्टं तया जानाति किं ब्रूते किं च कार्यं करोति कर्तृत्वाभिमानरहितत्वात्तत्त्वाति

समस्तं कल्पनामात्रमात्मा मुक्तः सनातनः। इति विज्ञाय धीरो हि किमभ्यस्यति बालवत्॥७॥ आत्मा ब्रह्मेति निश्चित्य भावाभावौ च कल्पितौ। निःकामः किं विजानाति किं ब्रूते च करोति किं॥८॥ अयं सोहमयं नाहमिति क्षीणा विकल्पना। सर्वमात्मेति निश्चित्य तूष्णींभूतस्य योगिनः॥९॥

न च कापि न क्रियाकर्त्तेत्यर्थः॥८॥ सर्वमात्मेति ज्ञानेन सर्वकल्पनानिवर्त्तकमित्याह अयमिति। सर्वमात्मेति निश्चित्य अनुभूय तूष्णींभूतस्य निवृत्तव्यापारस्य पुंस इति विविधाः कल्पनाः क्षीणा भवंति। इति किं अयं सोहमिति यः कालेऽपूर्वदिने ज्ञातम् दृष्टवान् सोऽहं जयति अयं देवदत्तो गौर इति नाहं यज्ञदत्तादिरूपः कल्पनाः क्षीणा भवंतीत्यर्थः॥९॥

निवृत्तसंकल्पस्य स्वरूपमाह ॥ श्लोकत्रयं न विक्षेप इति उपशांतविकल्पस्य योगिनः विक्षेपो व्यग्रता एकाग्र्यादिकमपि नेत्यर्थः ॥१०॥ स्वराज्य इति । स्वराज्ये स्वर्गराज्ये भैक्ष्यवृत्तौ च प्रारब्धवशात् लाभे तत्त्वलाभे वा जने जने समूहे विजने वने च विशेषो योगिनो नास्ति । कीदृशस्य निर्विकल्पस्य विकल्परहितस्वस्वभावस्येत्यर्थः ॥११॥ क्व धर्म इति ॥ इदं कृतमिदं न कृतमित्या

न विक्षेपो न चैकाग्र्यं नातिबोधो न मूढता ॥ न सुखं न च वा दुःखमुपशांतस्य योगिनः ॥ स्वराज्ये भैक्ष्यवृत्तौ वा लाभालाभे जने वने ॥ निर्विकल्पस्वभावस्य न विशेषोऽस्ति योगिनः ॥११॥ क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता ॥ इदं कृतमिदं नेति द्वंद्वैर्मुक्तस्य योगिनः ॥१२॥ कृत्यं किमपि नैवास्ति न कापि हृदि रंजना ॥ यथा जीवनमेवेह जीवन्मुक्तस्य योगिनः ॥१३॥

दि द्वंद्वैर्मुक्तस्य योगिनः धर्मार्थकामाः विवेकता मोक्षोपायभूतो विवेकश्च न भवति तन्मूलभूताविद्याकामसंकल्पादीनां विनाशादित्यर्थः ॥१२॥ कृत्यं नहि जीवन्मुक्तस्य लोके ॥ ये त्यापि वसजीवनादृष्टवशादेव स्यात् । कृतमिति । जीवन्मुक्तस्य योगिनः संकल्पवता किमपि कृत्यं नास्ति तथा हृदि मनसि कापि रंजना कोऽपि अनुरागो नास्ति तत्कतमूलाविद्याया अभावात् । तथापि तस्य कृत्यं यथा जीवनादृष्टमनतिक्रम्य भवतीत्यर्थः ॥१३॥

क्व मोह इति॥ सर्वसंकल्पसीमायामात्मबुद्धौ विश्रान्तस्य मोहादिकं क्व भवति किंकार
णाभावादित्यत्र भवति किमपि कारणाभावादित्यत्र भवति। आत्मबुद्ध्या कारणोपमर्दादि
त्यर्थः॥१६॥ येनेति। येन इदं विश्वं घटपटादि दृष्टं सत्तादृष्टं तत्संस्कारकं दाचि
त्घटादिकं नास्तीति करोत्येवै नास्तीति ज्ञानात् यः पश्यन्नपि न पश्यति स निर्वासनः
सन् किं करोति। यद्विषयकसंस्कारोऽपि नास्ति तस्य कर्तुमशक्यत्वादित्यर्थः॥१७॥

क्व मोहः क्व च वा विश्वं क्व तद्ध्यानं क्व च मुक्तता॥ सर्वसंकल्पसीमायां विश्रान्त
स्य महात्मनः॥१६॥ येन विश्वमिदं दृष्टं स नास्तीति करोतु वै॥ निर्वासनः
किं कुरुते पश्यन्नपि न पश्यति॥१७॥ येन दृष्टं परं ब्रह्म सोऽहं ब्रह्मेति चिन्तयेत्
किं चिन्तयति निश्चिन्तो द्वितीयं यो न पश्यति॥१८॥ दृष्टो येनात्मविक्षेपो निरोधं कु
रुते त्वसौ॥ उदारस्तु न विक्षिप्तः साध्याभावात्करोति किं॥१९॥

येनेति। येन परं व्यतिरिक्तं ब्रह्म दृष्टं स सोऽहं ब्रह्मास्मीति चिन्तयेत्। यस्तु द्वितीयं न पश्यति स
निश्चिन्तः सर्वचिन्तारहितः स तु किंचिदपि न किमपि चिन्तयति। द्वितीयात्मानुभवस्था
लिनि ब्रह्मणि चिन्तनमपि नास्तीत्यर्थः॥१८॥ ज्ञानिनि निश्चिन्तनिरोधोऽपि नास्तीत्याह दृष्ट इ
ति॥ येनात्मविक्षेपश्चित्तादिभ्रमो दृष्टः सोऽसौ पुरुषश्चित्तनिरोधं कुरुते विक्षेपदर्शना
ञ्च उदारः सर्वत्राद्वितीयात्मदर्शी तु विक्षिप्तो न तस्य नास्ति स विक्षेपदर्शनाभावात् तस्य सा
ध्यस्याभावात्किं कुरुते कथं निरोधं कुरुतां॥

॥६२॥

श्रुक्त०
३३

इदमेव विवृणोति ॥ धीर इति । धीरः अद्वितीयात्मविश्रान्तः लोकविपर्यस्तः लोकेषु वि-
क्षेपरहितः प्रारब्धवशात् लोकवत् वर्तमानोऽपि व्याधितानुवृत्त्या व्यवहारपरोऽपि स्वस्य स-
माधिं विक्षेपं स्वस्य पारमार्थिकस्वरूपलोपं अहं ब्रह्मास्मि इत्यादिकं न पश्यति चिन्मात्रदर्शित्वात् ॥ १८ ॥
भावाभावेति ॥ यो बुधः तृप्तः स्वात्मानुभवतृप्तः अत एव भावाभावभासस्फूर्तिविहीनः अत एव निर्वा-
सनः तेन लोकदृष्ट्या कुर्वतापि किंचिदपि नैव कृतं स्यात् ... ज्ञानेनैव कर्तृत्वाध्यासबाधा-
दित्यर्थः ॥ १९ ॥

धीरो लोकविपर्यस्तो वर्तमानोऽपि लोकवत् । न समाधिं न विक्षेपं न लोपं स्वस्य पश्य-
ति ॥ १८ ॥ भावाभावविहीनो यस्तृप्तो निर्वासनो बुधः । नैव किंचित्कृतं तेन लो-
कदृष्ट्यापि कुर्वता ॥ १९ ॥ प्रवृत्तौ वा निवृत्तौ वा नैव धीरस्य दुर्ग्रहः । यदा यत्कर्तु-
मायाति तत्कृत्वा तिष्ठतः सुखं ॥ २० ॥

इदमेव विशदयति । प्रवृत्तौ वेति । धीरस्यात्मविश्रान्तस्य प्रवृत्तौ वा निवृत्तौ वा दुराग्रहः दु-
राग्रहः कर्तृत्वाभिमानो नास्ति कीदृशस्य धीरस्य प्रारब्धवशाद्यदा यत्प्रवृत्तं वा नि-
वृत्तं वा कर्तुमायाति तत्सुखमनायासं यथा स्यात्तथा कृत्वा तिष्ठतः अत एव कर्तृ-
त्वाभिमानाभावात् तानि कृतान्यकृतानीवेत्यर्थः ॥ २० ॥ ननु ज्ञानी चेन्निर्वासनस्त-
र्हि केन प्रयुक्तः कर्म करोति इत्याशंक्याह ॥ निर्वासन इति ॥ ०॥

३३

65

निर्वासनः एतत् एव निरालंबः कर्त्तव्याकर्त्तव्यानुसंधानरहितः एतत् एव स्वच्छंदः रागद्वेषानधीनः यतो मुक्तः बंधनं बंधपरत्वं तेन शून्यः ज्ञानी संस्कारवातेन क्षिप्तः प्रारब्धपवनेन प्रेरितः सन् शुष्कपर्णवत् विचेष्टते॥२१॥ संसारसंकल्पादिशून्यस्य सर्वदा सन्तुष्टस्य एव स्यात्॥ असंसारस्येति॥ न विद्यते संसारहेतुः संकल्पो यस्य तस्य असंसारस्य हर्षादिको धर्मो न जायते। एतत् उपरिहितत्वेन नित्यं शीतलमना विदेह मुक्त इव

निर्वासनो निरालंबः स्वच्छंदो मुक्तबंधनः॥ क्षिप्तः संस्कारवातेन चेष्टते शुष्कपर्णवत्॥२१॥ असंसारस्य न क्वापि न हर्षो न विषादता॥ स शीतलमना नित्यं विदेह इव राजते॥२२॥ कुत्रापि न जिहासास्ति नाशो वापि न कुत्रचित्॥ आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः॥२३॥

राजते परं उपरिरहितः शिव इति स्मृतः॥२२॥ कुत्रापीति॥ आत्मनि आत्मा आरामः यस्य अत एव धीरस्य निश्चितचित्तस्य अत एव शीतलः अच्छतरः निर्मलतरः आत्मा मनो यस्य स शीतलाच्छतरात्मनः तस्य कुत्रापि जिहासा त्यागेच्छा नास्ति उपादानेच्छापि नास्ति रागद्वेषाभावात् नाशोपि अनर्थोपि कुत्रचित् नास्ति पूर्णत्वेन तोषितानस्याभावादित्यर्थः॥२३॥०॥

66

अ॰गी॰
३४

प्रकृत्येति॥ प्रकृत्या स्वभावेन शून्यं विकाररहितं चित्तं यस्य तस्य धीरस्य आत्मविश्रांत-
स्य प्राकृतस्येव कर्तृत्वाभिमानरहितस्य यदृच्छया प्रारब्धवशात्कुर्वतोऽप्यस्य विदुषः मानावमानौ
न संधानं नास्तीत्यर्थः॥ ५६॥ कृतं देहेनेति॥ इति चिन्तानुरोधी अनुरुध्यते निरंतरं प्रयाति
स कुर्वन्नपि न करोति कर्तृत्वाभिमानाभावादित्यर्थः॥ ५७॥

प्रकृत्या शून्यचित्तस्य कुर्वतोऽस्य यदृच्छया। प्राकृतस्येव धीरस्य न मा-
नो नावमानता॥ ५६॥ कृतं देहेन कर्मेदं न मया शुद्धरूपिणा॥ इति
चिन्तानुरोधी यः कुर्वन्नपि करोति न॥ ५७॥ अतद्वादीव कुरुते न भ-
वेदपि बालिशः। जीवन्मुक्तः सुखी श्रीमान् संसरन्नपि शोभते॥ ५८॥

अतद्वादीति॥ जीवन्मुक्तः अतद्वादीव अहमिदं न करिष्यामीत्यवदन्नेव का-
र्यं कुरुते प्रारब्धवशात्। अवदन्नपि बालिशो मूर्खो न भवेत्। अतत्कर्तृत्वात्। अत
एव संसरन्नपि संसारव्यवहारं कुर्वन्नपि अंतरसुखी अत एव श्रीमान् प्रसन्न-
तया शोभावान् अपरोक्षं शोभते दीप्यते स्वप्रकाशा इत्यर्थः॥ ५८॥

३४

नेति। नानाविचारैर्द्वैतविचारैः सुश्रान्तः इव निवृत्तो यतो धीरो ज्ञानी अतएव कृतान्तमन्येव विश्रान्तिमागतः अतएव न कल्पते संकल्पादिकं मनोव्यापारं न करोति न जानाति बुद्धिव्यापारं न करोति न शृणोति न पश्यति इन्द्रियमात्रव्यापारं न करोति कर्तृत्वाभिमानाभावादित्यर्थः॥२६॥ असमाधेरिति॥ ज्ञानी मुमुक्षुर्न भवति असमाधेः समाधेः स्काराणां तथा इतरो बद्धो न अविक्षेपात् [illegible] इत्यर्थः। कीदृशस्तर्हि ज्ञानी इत्याशंक्याह॥

नानाविचारसुश्रान्तो धीरो विश्रान्तिमागतः॥ न कल्पते न जानाति न शृणोति न पश्यति॥२६॥ असमाधेरविक्षेपान्न मुमुक्षुर्न चेतरः॥ निश्चित्य कल्पितं पश्यन्ब्रह्मैवास्ते महाशयः॥२८॥ यस्यान्तः स्यादहंकारो न करोति करोति सः॥ निरहंकारधीरेण न किंचिदकृतं कृतम्॥२९॥

निश्चित्येति॥ इदं सर्वं कल्पितमिति पूर्वं निश्चित्य पश्चाद्द्वितानुवृत्त्या पश्यन्नपि महाशयो निर्विकारचित्तः अतएव ब्रह्मैवास्ते॥२८॥ ननु संसारस्य स्पष्ट्वे लक्ष्यते ब्रह्मत्वमित्याशंक्याहंकाराभावादित्याह॥ यस्येति॥ यस्य अन्तः अहंकारोऽहंकाराध्यासः स्यात् स लोकदृष्ट्या न कुर्वन्नपि संकल्पादिकं करोति कर्तृत्वाध्यासात्। निरहंकारेण अतएव धीरेण कर्तृत्वाध्यासरहितेन अपि लोकदृष्ट्या कृतं तथापि स्वदृष्ट्या न किंचिदपि कृतं तत्त्वाध्यासाभावादित्यर्थः॥२९॥ मुक्तोऽपि
नं चरमयति [illegible] नोद्विग्नमिति [illegible]।

टीका॰
३५

मुक्तस्य चित्तं राजते केवलप्रकाशरूपमेव यतो नोद्विग्नं उद्वेगहेतोर्द्वेषस्याभावात् न च संतुष्टं संतोषहेतोरनुरागाभावात् तथा अकर्तृस्पन्दवर्जितं संकल्पविकल्पशून्यं गततत्वाद्विरागात् संदेहं यस्मात्तत्त्वसंदेहहेतोरज्ञानस्य नष्टत्वादित्यर्थः॥२७॥ निर्ध्यातुमिति। यच्चित्तं निर्ध्यातुं निर्ध्यानं निर्विकल्पत्वेन स्थातुं चेष्टां कर्तुं वापि न प्रवर्तते न संकल्पयति किंतु इदं चित्तं निर्निमित्तं संकल्परहितमेव सन् निर्ध्यायति निश्चितं स्वरूपेति

नोद्विग्नं न च संतुष्टमकर्तृस्पन्दवर्जितं॥ निराशं गतसंदेहं चित्तं मुक्तस्य राजते॥२८॥
निर्ध्यातुं चेष्टितुं वापि यच्चित्तं न प्रवर्तते। निर्निमित्तमिदं किंतु निर्ध्यायति विचेष्टते॥२९॥ तत्त्वं यथार्थमाकर्ण्य मंदः प्राप्नोति मूढतां॥ अथवा याति संकोचममूढः कोपि मूढवत्॥३०॥

ष्ठति तथा विचेष्टते विविधां चेष्टां करोतीत्यर्थः॥२९॥ तान्यतानि नो विशेषं वदन्त्येव तानि नो विरलत्वमात्। तत्त्वमिति। मंदः अज्ञानी यथार्थं तत्त्वं पदार्थमेवं श्रुत्वा आकर्ण्य असंभावनाविपरीतभावनाभ्यां मूढतां अविवेकं प्राप्नोति। अथवा शास्त्रार्थसाक्षात्काराय संकोचं चित्तसमाधिं प्राप्नोति कोपि सत्संस्कारवान् अन्तरसंमूढोपि बाह्य ३५
गत्या मूढवत् बहिर्व्यवहारकर्ता भवति॥३०॥

(69)

प्रथवा यातिसंकोचमित्यनेनोक्तम्। एकाग्रता निरोधो वा मूढैरभ्यस्यते। एकाग्रतेति। एकाग्रता एकतत्त्व निष्ठचित्तत्वम् अथवा निरोधः चित्तवृत्तिनिरोधो मूढैरनुत्पन्नात्मसाक्षात्कारैर्विपरीतभावनानिवृत्त्यर्थं भृशमत्यर्थमभ्यस्यते स्वस्थवत् सुषुप्तवद्वैतरहितधीरा हित्वेन स्वपदे स्वस्वरूपे स्थिता धीरा विज्ञानिनः कृत्यं किमपि कृत्यं न पश्यन्ति। एतेनात्मसाक्षात्कारे योगानां दाहित्रमस्य दूरापास्तत्वादित्यर्थः॥३३॥ निरोधस्यापि किं विलक्षणमाह। अप्रयत्नादिति। मूढः पुरुषः अप्रयत्नाच्चित्तनिरोधात्प्रयत्नात्कर्मानुष्ठानाद्वा निर्वृतिं परमसुखं न प्राप्नोति किन्तु ज्ञानेनैवेतो रात्मानन्दानुभा

एकाग्रता निरोधो वा मूढैरभ्यस्यते भृशम्। धीराः कृत्यं न पश्यन्ति सुप्तवत्स्वपदे स्थिताः॥३३॥ अप्रयत्नात्प्रयत्नाद्वा मूढो नाप्नोति निर्वृतिम्। तत्त्वनिश्चयमात्रेण प्राज्ञो भवति निर्वृतः॥३४॥ शुद्धं बुद्धं प्रियं पूर्णं निःप्रपञ्चं निरामयम्। आत्मानं तं न जानन्ति तत्राभ्यासपरा जनाः॥३५॥

वादित्यर्थः। प्राज्ञोऽस्तु समाधिं वा कर्म वाप्यकुर्वन्नपि तत्त्वनिश्चयमात्रेण सुखी च भवति। दुःखहेतोरज्ञानस्याज्ञानदग्धत्वादित्यर्थः॥३४॥ ननु मूढस्य योगाभ्यासादात्मानुभवो भविष्यतीत्याशङ्क्याह। शुद्धमिति। तत्र जगति योगाभ्यासपरा जना आत्मानं न जानन्ति कीदृशं शुद्धं मायामलरहितं बुद्धं स्वप्रकाशं प्रियं सुखरूपं पूर्णं पतितो निःप्रपञ्चं प्रपञ्चशून्यं निरामयं दुःखसंबन्धरहितम्॥३५॥ इदमेव विवृणोति॥ नाप्नोतीति॥०॥

अष्टा०
३९

विमूढोऽज्ञानावृतः अभ्यासरूपिणा योगाभ्यासात्मकेन कर्मणा मोक्षं नाप्नोति न कर्मणा न प्रजया धनेनेति श्रुतेः। धन्यो भाग्यवान् ज्ञानी विज्ञानमात्रेण विक्रियया निरस्तविद्याकार्यकर्मसु अविक्रियः सन् मुक्तस्तिष्ठति॥३६॥ मुमुक्षुः स्वयं विमूढो ब्रह्म नाप्नोतीत्याह॥ मूढ इति॥ मूढोऽज्ञानी यतः चित्तनिरोधादेव ब्रह्म भवितुमिच्छति इति तत्तो ब्रह्म नाप्नोति हि निश्चितं धीरो ज्ञानी ज्ञानिच्छन्नपि ब्रह्म भवितुमनिच्छन्नपि परब्रह्मस्वरूपभाक् व्याप्यव्यापकभावाज्ञानस्य निवृत्तत्वादित्यर्थः॥३७॥

नाप्नोति कर्मणा मोक्षं विमूढोऽभ्यासरूपिणा। धन्यो विज्ञानमात्रेण मुक्तस्तिष्ठत्य-
विक्रियः॥३६॥ मूढो नाप्नोति तद्ब्रह्म यतो भवितुमिच्छति। अनिच्छन्नपि धीरो हि परब्र-
ह्मस्वरूपभाक्॥३७॥ निराधारा ग्रहव्यग्रा मूढाः संसारपोषकाः। एतस्यानर्थमूल-
स्य मूलच्छेदः कृतो बुधैः॥३८॥ न शान्तिं लभते मूढो यतः शमितुमिच्छति। धीरस्त-
त्त्वं विनिश्चित्य सर्वदा शान्तमानसः॥३९॥

एतदेव स्फुटयति। निराधारा इति॥ मूढः अज्ञानिनः निराधाराग्रहव्यग्राः केवलेन चित्तनिरोधेनैवाहं मोक्ष्यामीति निःकारणग्रहव्यग्राः सन्तः संसारपोषकाः संसारनिवर्तकज्ञानपराङ्मुखत्वात् बुधैर्ज्ञानिभिः अनर्थमूलस्य एतस्य संसारस्य मूलच्छेदः कृतः संसारमूलभूतस्याज्ञानस्य ज्ञानेन निवृत्तत्वादित्यर्थः॥३८॥ न शान्तिमिति॥ मूढः अज्ञानी यतश्चित्तनिरोधादेः शमितुमिच्छति ततः शान्तिं न लभते धीरो विवेकी तत्त्वमिति विनिश्चित्य शमितुमनिच्छन्नपि स्वभावादेव सर्वदा शान्तमनसो भवति यतः विकारहेतोरज्ञानस्य निवृत्तत्वादित्यर्थः॥३९॥

द्वि०
३९

क्वात्मन इति॥ यद्दृष्टं यस्य दृष्टं तान्नेत्रसंवलंबते दृश्यं विषयीकरोति तस्यात्मनो दर्शनं क्व न
क्वापि स्यर्थः। धीरास्तांस्तान् तं तिमिरप्रदीपनादिकं दृश्यं पदार्थं न पश्यंति किंतु चिद्रूपमात्मा
नं पश्यंति॥४०॥ क्वेति। यः अज्ञानी शुष्कचित्तनिरोधे निर्बंधं करोति तस्य मूढस्य क्व चित्त
निरोधः न क्वापि अज्ञानिनां समाध्युपगमे पुनश्चित्तप्रसरात् स्वारामस्यैव आत्मारामस्य
स्यैव ज्ञानवतो धीरस्य चित्तस्य सर्वदा असौ चित्तनिरोधः अकृत्रिमः स्वभाविकः सर्वदा

क्वात्मनो दर्शनं तस्य यद्दृष्टमवलंबते॥ धीरास्तं तं न पश्यंति पश्यंत्यात्मानम
व्ययं॥४०॥ क्व निरोधो विमूढस्य यो निर्बंधं करोति वै॥ स्वारामस्यैव धीर
स्य सर्वदासावकृत्रिमः॥४१॥ भावस्याभावकः कश्चिन्न किंचिद्भावकोऽपरः॥
उभयाभावकः कश्चिदेवमेव निराकुलः॥४२॥

त्यात्मानुभावशालित्वात्॥४१॥ भावस्येति। कश्चित् तार्किकादिः भावस्य भावकः
भावरूपः परमार्थः सन् प्रपंच इति भावयति मन्यते इति भावकः अपरः शून्यवा
दी बौद्धः न किंचिदस्तीति भावयतीति न किंचिद्भावकः कश्चित्तु हठयोगी कश्चिदात्मानु
भावशाली उभयाभावकः सन्नेव उभयाभावेनैव निराकुलः स्वस्थचित्तः अस्तीत्य
र्थः॥४२॥ न किंचिदपि चिंतयेदिति भगवद्वचनं सिद्धांतमभिप्रेत्याह। शून्यमिति॥०

अष्टा०
३७

कुबुद्धयो मूढबुद्धय एव शुद्धं निर्मलं अद्वयं द्वैतवर्जितं आत्मानं ज्ञानतनशीलं व्यापकं भाव
यंति चिंतयंति न तु जानंति साक्षात्कुर्वंति कुतः संमोहात् निर्मलत्वस्य कल्पितमलसा
पेक्षत्वात् अद्वयस्य कल्पितद्वैतसापेक्षत्वात् आत्मत्वस्य च कल्पितानात्मसापेक्षत्वात् सा
पेक्षरूपचिंतनेन तु मोहानिवृत्तेः यतो न जानंति अतः यावज्जीवमनिर्वृताः परमसु
खरहिताः संतो बंधस्य ज्ञानेकल्पनादिसमर्थः ॥४३॥ इदमेव विशदयति । मुमुक्षोरिति ॥

शुद्धमद्वयमात्मानं भावयंति कुबुद्धयः ॥ न तु जानंति संमोहाद्यावज्जीवमनिर्वृताः ॥४३॥
मुमुक्षोर्बुद्धिरालंबमंतरेण न विद्यते ॥ निरालंबैव निष्कामा बुद्धिर्मुक्तस्य सर्वदा ॥४४॥
विषयद्वीपिनो वीक्ष्य चकिताः शरणार्थिनः ॥ यत्नायंते न शान्ताः सेवंते कृतचारवः ॥४५॥

मुमुक्षोरनधिगतात्मसाक्षात्कारस्य बुद्धिः सविशेषालंबनमंतरेण न विद्यते साक्षात्का
राभावात् मुक्तस्य जीवन्मुक्तस्य तु एवमुक्तापि निष्कामा बुद्धिः सर्वदा निरालंबैव निर्वि
विशेषात्मानुभवरूपैव सविशेषादिपरित्यागेनैवात्मानुभवः ॥४४॥ निरोधोपि विष
यस्य त्विति किं तैरेवानुष्ठीयते न तु विद्वद्भिरित्याह । विषयेति । विषयद्वीपिनो विषयव्या
घ्रान् वीक्ष्य शार्दूलद्वीपिनो व्याघ्रचित्रकायामरः । भीताः शरणार्थिनः स्वरक्षणार्थिनः
मूढा एव निरोधसिद्धये एकांतस्य वृत्तिनिरोधाय गिरिगुहाकोटरं कंदरान्तः प्रवेशं विशंति

३७

73

वासनात्यागेन विषयभयनिवृत्तिहेतुमाह ॥ निर्वासनमिति ॥ निर्वासनो यः पुरुषस्तद्रूपं हरिं सिंहं दृष्ट्वा दन्तिनो विषयाख्या गजाः अशक्ताः सन्तस्तूष्णीं मौनं यथा स्यात्तथा पलायन्ते कृतचाटवः कृतप्रियवचना एव तं निर्वासनं ईश्वरं राजानमिव सेवन्ते इत्यर्थः ॥४५॥ ध्यानमपि नास्तीत्याह ॥ निःशंक इति ॥ गतसंशयः कृतकृत्यो युक्तमानसो निश्चलमानसः ज्ञानी मुक्तिकारिकां यमनियमादिक्रियां न धत्ते किन्तु हि स्वच्छन्दं नित्यानन्दरूपात्मानं पश्यन् लोकदृष्ट्या चेष्टते पश्यनादिक्रियाः कुर्वन्नास्ते इत्यर्थः ॥४६॥

निर्वासनं हरिं दृष्ट्वा तूष्णीं विषयदन्तिनः ॥ पलायन्ते न शक्तास्ते सेवन्ते कृतचाटवः ॥४५॥ न मुक्तिकारिकां धत्ते निःशंको युक्तमानसः । पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन्नास्ते यथासुखं ॥४६॥ वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः ॥ नैवाचारमनाचारमौदास्यं वा प्रपश्यति ॥४७॥ यदा यत्कर्तुमायाति तदा तत्कुरुते ऋजुः ॥ शुभं वाप्यशुभं वापि तस्य चेष्टा हि बालवत् ॥४८॥

किञ्चेति ॥ वस्तुनः श्रीरामात्मनः श्रवणमात्रेण यो नाम शुद्धबुद्धिः संशयरहितः स निराकुलः ॥ स्वस्वरूपस्थः पुरुषः आचारं क्रियानुष्ठानं अनाचारं नैष्कर्म्यं उभयत्राप्युदासीनत्वं नैव प्रपश्यति नानुसन्धत्ते इत्यर्थः ॥४७॥ यदेति ॥ यदा यत् शुभं नैष्कर्म्यं विहितं कर्म वा कर्तुमायाति तदा लोकदृष्ट्या प्रारब्धवशात् कुरुते ऋजुः सरलः यतः कारणात् तस्य चेष्टा बालवन्निरभिसन्धिर्भवन्तीत्यर्थः ॥४८॥ ॥०॥

75

यो॰व॰
३८

स्वातंत्र्यादिति ॥ स्वातंत्र्या रागद्वेषानाधीनत्वात्सर्वमनःप्रसादमाप्नोति यतः स्वातंत्र्यात्तानं
प्राप्नोति । तथा स्वातंत्र्यात्कान्तिवृत्तिं नित्यसुखं गच्छेत् न ग्राम्यसुखं यावत्स्वातंत्र्यस्य मं
दत्वं तस्य विश्रान्तिं गच्छेत् ॥ ५० ॥ पुरुषकर्तृत्वमिति ॥ यदा स्वात्मनः पुरुषकर्तृत्वं मन्यते तदा
समस्ताः चित्तवृत्तयः क्षीणा भवंत्येव यस्मै कर्म हि कारिष्यामि [illegible] भोग्यं भवति

स्वातंत्र्यात्सुखमाप्नोति स्वातंत्र्याल्लभते परं ॥ स्वातंत्र्यात्कान्तिवृत्तिं गच्छेत् स्वातंत्र्या
त्परमं पदं ॥ ५० ॥ पुरुषकर्तृत्वमभोक्तृत्वं स्वात्मनो मन्यते यदा । तदा क्षीणा भवंत्येव
समस्ताश्चित्तवृत्तयः ॥ ५१ ॥ उच्छृंखलाप्यकृतिका स्थितिर्धीरस्य राजते । न तु
संस्पृहचित्तस्य शान्तिर्मूढस्य कृत्रिमा ॥ ५२ ॥

तदादिचित्तवृत्त्युदये तत्त्वज्ञानमन्यासाम् भोगपदार्थे विषयाणामपि चित्त
वृत्तीनामनुदयादित्यर्थः ॥ ५१ ॥ उच्छृंखलेति ॥ धीरस्य वीतस्पृहस्य अकृत्रिमा कृ
त्रिमा उच्छृंखलापि शोभिता स्थितिः शोभते संस्पृहचित्तस्य मूढस्य कृ
त्रिमा शान्तिर्न शोभते इत्यर्थः ॥ ५२ ॥ निरस्तकल्पनानां ज्ञानिनां तु भोगत्यागयोः
र्यथानाग्रहस्त्याह ॥ विलसंतीति ॥ ५३ ॥

३८

निरस्तकल्पनानां ज्ञानिनां तु भोगेऽत्याग्रहो योगे च नाग्रहस्तस्मात् ॥ विलसंतीति ॥ केचित्
प्रारब्धवशान्महाभोगैर्विलसंति क्रीडंति केचिच्च प्रारब्धवशाद्गिरिगह्वरान् पर्वतवनानि
विशंति कीदृशास्ते एवं द्वयं समाचरंतीत्यत आह निरस्तेति अबुद्धयः कर्तृत्वाध्यासरहिताः मुक्तबुद्धयस्त्यक्तधियः
निरस्तवासना धीरा ज्ञानिनः कदाचित्प्रारब्धवशान्महाभोगैर्विलसंति क्रीडंतीत्यर्थः ॥५३॥
श्रोत्रियमिति ॥ धीरस्य ज्ञानिनः श्रोत्रियं देवतां तीर्थं पूजने सति दृष्ट्वा कापि वासना हृदि धर्मा
र्थकामवासना न जायते ॥

विलसंति महाभोगैर्विशंति गिरिगह्वरान् ॥ निरस्तकल्पना धीरा अबद्धा मुक्तबुद्धयः ॥५३॥ श्रोत्रियं देवतां तीर्थमंगनां भूपतिं प्रियं ॥ दृष्ट्वा संपूज्य धीरस्य न कापि हृदि वासना ॥५४॥ भृत्यैः पुत्रैः कलत्रैश्च दौहित्रैश्चापि गोत्रजैः ॥ विहस्य धिक्कृतो योगी न याति विकृतिं मनाक् ॥५५॥ संतुष्टोऽपि न संतुष्टः खिन्नोऽपि न च खिद्यते ॥ तस्याश्चर्यदशां तां तां तादृशा एव जानते ॥५६॥

स्त्रीणां नृपतिं प्रियं पुत्रादिकं च दृष्ट्वा कापि काम्यपदार्थवासना न जायते । सर्वत्र समबु
द्धित्वादित्यर्थः ॥५४॥ भृत्यैः पुत्रैः कलत्रैश्चेति । भृत्यादिभिर्विहस्य उपहस्य धिक्कृतोऽधिक्षि
रस्कृतो योगी मनाक् किंचिदपि विकृतिं चित्तक्षोभं न याति रागद्वेषहेतोर्मोहस्याभावादित्य
र्थः ॥५५॥ संतुष्ट इति । लोके दृष्टा संतोषादि पुत्रकोपि वस्तुतः तद्रहितः । तस्य ज्ञाने नस्तो

अ०१०
३८

कर्तव्यतैवेति ॥ कर्तव्यतैव ममेदं कर्तव्यमिति कार्यसंकल्प एव संसार दुःखहेतुत्वात् । सूरयो
ज्ञानिनस्तां कर्तव्यतां न पश्यन्ति न संकल्पयन्ति । संकल्पमात्ररहितत्वात् कीदृशाः सूरयः
शून्याः सर्वकार्यशून्यैस्तथा वर्तमानघटाद्याकारे तथा निराकारे व्याहृते निर्विकाराः समदर्शिनः
अत एव निरामयाः संकल्पोपद्रवरहिता इत्यर्थः ॥५७॥ अकुर्वन्नपीति ॥०॥

कर्तव्यतैव संसारो न तां पश्यन्ति सूरयः ॥ शून्याकारे निराकारे निर्विकारा निरा
मयः ॥५७॥ अकुर्वन्नपि संक्षोभाद्व्यग्रः सर्वत्र मूढधीः ॥ कुर्वन्नपि तु कृत्यानि
कुशलो हि निराकुलः ॥५८॥ सुखमास्ते सुखं शेते सुखमायाति याति च ॥
सुखं वक्ति सुखं भुंक्ते व्यवहारेपि शांतधी ॥५९॥

अकुर्वन्नपि मूढधीः सर्वत्र शून्याकारे निराकारे च संक्षोभात् संकल्पाद्व्यग्रो भवति
लोके दृष्ट्या कृत्यान्यपि कुर्वन्नपि कुशलो विद्वान् हि निश्चितं निराकुलो निश्चलचित्तः
निरामयः स्यात् ॥५८॥ सुखमिति ॥ प्राप्तान् व्यवहारेपि जायमाने शांतधी रागादि
शून्यबुद्धिर्विद्वान् आत्मसुखमनतिक्रम्यैवास्ते उपविशति शेते गच्छति वक्ति भुंक्ते सर्वे
न्द्रियव्यापारं करोतीत्यर्थः ॥५९॥

३८

न नुक्तानि नेऽपि व्यवहारेषु कथं न खेदः इत्यत आह। स्वभावादिति॥ व्यवहारिणोऽपि य
स्यार्त्तानितः लोकवत् प्राकृतजनवत् स्वाभाविकी खेदो न जायते कुतः स्वभावात् मोहराह
त्यानंदस्य स्वभावात्मीमर्थादित्यर्थः॥ सगतक्लेशो ज्ञानी महाह्रद इवाक्षोभ्यो निर्विकारः
सुशोभते॥९०॥ निवृत्तिरिति॥ लोकदृष्ट्या प्रतीयमानेऽपि मूढस्य बाह्येन्द्रियव्यापारा
न्निवृत्तिरिति॥ लोकदृष्ट्या प्रतीयमानेऽपि मूढस्य बाह्येन्द्रियव्यापाराणां निवृत्तिः प्रवृत्तिरूप
एव जायते अहंकारादीनाम निवृत्तत्वात्

स्वभावाद्यस्य नैवार्तिर्लोकवद्व्यवहारिणः। महाह्रद इवाक्षोभ्यो गतक्लेशः सुशोभते॥९०
निवृत्तिरपि मूढस्य प्रवृत्तिरुपजायते॥ प्रवृत्तिरपि धीरस्य निवृत्तिफलभागिनी॥९१॥
परिग्रहेषु वैराग्यं प्रायो मूढस्य दृश्यते॥ देहे विगलिताशस्य क्व रागः क्व विरागता॥९२॥

धीरस्य ज्ञानिनः लोकदृष्ट्या प्रारब्धवशात् प्रतीयमानापि प्रवृत्तिरपि निवृत्तिफलभा
गिनी निष्फलपर्यवसायिनी स्यात् अहंकाराभिमानाभावादित्यर्थः॥९१॥ परिग्रहेति॥ मूढ
स्य देहाभिमानिनस्तत्संबंधितया परिगृहीतेषु परिग्रहेषु धनवेश्मादिषु प्रायो बाह्य
स्येन वैराग्यं दृश्यते॥ देहे विगलिताशस्य तत्संबंधिनिषु ज्ञगृहादौ रागः स्यात् क्व च श
क्व वा देहे विरागः स्यात् देहे रागविरागयोरभावेन तत्संबंधिषु रागविरागयोर्वक्तुमश
क्यत्वात् ॥९२॥१००॥

भावनेति ॥ मूढस्य दृष्टिः सर्वदा भावनायां अभावनायां वा आसक्ता अहं भावनां करोमि
यद्वाऽहमभावनां करोमीत्यहंकारात् । स्वस्थस्यात्मनिष्ठस्य तु सा दृष्टिः भाव्यभावनया
दृश्यचिंतया उल्लसितापि अदृष्टिरूपिणी दृश्यदर्शनरहितरूपैव स्यात् । अहं करोमीत्य
भिमानाभावादित्यर्थः ॥८२॥ ननु दृश्यभावने क्रियमाणेऽपि तत्र दृष्टिः कथं दृश्यानालं
बिनीत्याशंक्य निःकामत्वादित्याह । सर्वारंभेति ॥ यो बालवत् निष्कामः सन् प्रारब्धवशा
त्सर्वारंभे चरति प्रवर्त्तते तस्य शुद्धस्याहंकारमलवर्जितस्य कर्मणि क्रियमाणेऽपि न लेपः क

भावनाभावनासक्ता दृष्टिर्मूढस्य सर्वदा । भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी ॥८२॥
सर्वारंभेषु निःकामो यश्चरेद्बालवन्मुनिः । न लेपस्तस्य शुद्धस्य क्रियमाणेऽपि कर्मणि ॥८३॥
स एव धन्य आत्मज्ञः सर्वभावेषु यः समः ॥ पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् निस्तर्षमानसः ॥८४॥
क्व संसारः क्व चाभासः क्व साध्यं क्व च साधनं । आकाशस्येव धीरस्य निर्विकल्पस्य सर्वदा ॥८५॥

न्तात्स्यादहंकाराभावादित्यर्थः ॥८३॥ एवंविधोऽपि धन्य इत्याह । स एवेति । स कृतकृत्यत्वा
द्धन्यो नान्यः यः सर्वभावेषु समात्मबुद्धिः एव निस्तर्षमानसः विगततृष्णचित्तो भवति किं
कुर्वन् पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् ॥८४॥ तस्यैव धन्यत्वे युक्तिमाह । क्वेति । क्व सं
सारः क्व च आभासः क्व साध्यं क्व च साधनं धीरस्य ज्ञानिनः अत एव सर्वदा निर्विकल्पस्य रहितस्य सं
सारप्रपंचः क्व अत एव तत्प्रतिभासः क्व च अत एव साध्यं स्वर्गादिकं क्व अत एव साधनं यागादि

स जयतीति। त्यक्तार्थः संन्यासी दृश्याद्दृश्ययोजनशून्योऽयतः पूर्णस्वरसः पूर्णस्वभावो विग्रहः स्वरूपं यस्य स पूर्णस्वरसविग्रहो जयति सर्वोत्कर्षेण वर्तते। स कः। यस्याकृत्रिमः स्वाभाविकः अनवच्छिन्ने पूर्णस्वरूपे समाधिः अनवच्छिन्ने समाधिर्यस्य वर्तते स जयतीत्यर्थः॥६७॥ ज्ञाततत्त्वस्य पुंसः सर्वत्र निराकांक्षत्वमेव मुख्यं लक्षणमित्याह। बहुनेति। अत्र बहुनोक्तेन किं प्रयोजनं ज्ञाततत्त्वो महाशयः भोगमोक्षयोः फलयोर्निराकांक्षी सदा सर्वत्र भोगमोक्षसाधनेषु नीरसः निरनुरागः॥६८॥

स जयत्यर्थसंन्यासी पूर्णस्वरसविग्रहः। अकृत्रिमोऽनवच्छिन्ने समाधिर्यस्य वर्तते॥६७॥
बहुनात्र किमुक्तेन ज्ञाततत्त्वो महाशयः। भोगमोक्षनिराकांक्षी सदा सर्वत्र नीरसः॥६८॥
महदादि जगद्द्वैतं नाममात्रविजृंभितम्। विहाय शुद्धबोधस्य किं कृत्यमवशिष्यते॥६९॥
भ्रमभूतमिदं सर्वं किंचिन्नास्तीति निश्चयी। अलक्ष्यस्फुरणः शुद्धः स्वभावेनैव शाम्यति॥७०॥

महदादीति। महदहंकारपंचतन्मात्रापंचमहाभूतभौतिकजगद्रूपं द्वैतं नाममात्रेणैव विजृंभितं विहाय ... शुद्धबोधस्य स्वप्रकाशचिन्मात्रस्वरूपस्य किं कृत्यमवशिष्यते। सर्वदा सच्चिदानंदाधिगमेनैव कृतकृत्यत्वादिति भावः॥६९॥ ननु तथापि ... भ्रमभूतमिति। ... इदं सर्वं भ्रमभूतं किंचिदपि वास्तवं नास्तीति निश्चयी अलक्ष्यस्फुरणः चिन्मात्रप्रतिभासवान् ... स्वभावेनैव शाम्यति ... इत्यर्थः॥७०॥

अष्टा०
४१

शुद्धेति शुद्धस्फुरणरूपस्य स्वप्रकाशचिद्रूपस्यात एव दृश्याभावं दृश्यपदार्थमपश्यतः कुत्र कर्मप्रवृत्तिविधिः क्व केषु वा विषयेषु वैराग्यं क्व केषु पदार्थेषु त्यागः क्व केभ्यः पदार्थेभ्यः शमोऽपि वा कार्यः द्रष्टृदृश्यपदार्थस्यैवास्फुरणादित्यर्थः ॥७१॥ चिद्रूपेण प्रकाशमानस्य बंधादिकं नास्तीत्यर्थः ॥७२॥ बुद्धीति ॥ बुद्धिरात्मज्ञानं नेव पर्यंतो नाशो यस्य तस्मिन् संसारे मायामात्रं मायासंवलितं चैतन्यं विवर्त्तते ॥

शुद्धस्फुरणरूपस्य दृश्यभावमपश्यतः ॥ क्व विधिः क्व च वैराग्यं क्व त्यागः क्व शमोऽपि वा ॥७१॥ स्फुरतोऽनंतरूपेण प्रकृतिं च न पश्यतः ॥ क्व बंधः क्व च वा मोक्षः क्व हर्षः क्व विषादिता ॥७२॥ बुद्धिपर्यंतसंसारे मायामात्रं विवर्त्तते ॥ निर्ममो निरहंकारो निःकामः शोभते बुधः ॥७३॥ अक्षयं गतसंतापमात्मानं पश्यतो मुनेः ॥ क्व विद्या क्व च वा विश्वं क्व देहोऽहं ममेति वा ॥७४॥

एतादृशं ज्ञानाकारेण प्राप्नोति अतो बुधो विज्ञानवान् लिंगे शरीरादौ वा निरहंकारस्तत्संबंधिनि कलत्रादौ निर्ममः अत एव निष्कामः अत एव शोभते दीप्यते कामानामनभिमानत्वात् ॥७३॥ अक्षयमिति ॥ अक्षयं अविनाशिनं अत एव संतापरहितं आत्मानं पश्यतो मुनेः क्व विद्या क्व शास्त्राणीत्यर्थः क्व च वा विश्वं क्व च देहः अहं ममेति वा क्व आत्मातिरिक्तस्य विद्याविद्यादेरस्फुरणादित्यर्थः ॥७४॥ ४१

81

श्चात्मनस्तस्य द्वैतानर्थनिवृत्तिरित्युक्तं।। एतस्य तु चित्तनिरोधादीन्यपि कर्माणि कुंजरशौचव्य
र्थानीत्याह।। निरोधादीनीति।। यदि जडधीर्निरोधादीनि चित्तनिरोधादीनि जहाति तर्हि तत्क्षणात्। अस्मा
द्व्यवहरणादेव मनोरथान्प्रलपनात्स्वहरणाद्यासर्वव्यापारान्कर्तुमाप्नोति प्रवर्तते तस्मात्
मूढस्य चित्तनिरोधादिकर्म किंचित्कारमित्यर्थः।।७५।। मूढस्यात्मश्रवणमप्यनर्थकमित्याह।।
मंद इति।। मंदो मूर्खस्तत्वात्मवस्तु श्रुत्वापि मूढतां न जहाति मलिनचित्तस्य श्रवणाद

निरोधादीनि कर्माणि जहाति जडधीर्यदि।। मनोरथान्प्रलापांश्च कर्तुमाप्नोत्य
तत्क्षणात्।।७५।। मंदः श्रुत्वापि तद्वस्तु न जहाति विमूढतां।। निर्विकल्पो बहिर्यत्नादं
तर्विषयलालसः।।७६।। ज्ञानाद्गलितकर्मा यो लोकदृष्ट्यापि कर्मकृत्।। ना
प्नोत्यवसरं कर्तुं वक्तुमेव न किंचन।।७७।।

पि ज्ञानानुदयात्। एतदेव मूढः यत्नाद्बहिर्दृष्ट्या निर्विकल्पोपि एवं तर्मनसि विषयले
लुपो भवतीत्यर्थः।।७६।। ज्ञानीतु लोकदृष्ट्या कर्म कुर्वाणोप्यकर्तैव स्यात्।। ज्ञानादिति।। यः
ज्ञानाद्गलितकर्मा निष्क्रियो धीमान् सः लोकदृष्ट्या कर्मकृदपि किंचन कर्तुं वक्तुमेव कः अवसरं
नाप्नोति।। एवं कर्म करिष्यामीति वक्तुमपि अवसरं नाप्नोति कर्मावसरस्तु दूरमास्तामिति भावः

४२

विद्वांस्तु तमःप्रकाशादिकं न पश्यतीत्यर्थः ॥ हेतौ ॥ धीरस्य ज्ञानिनः एतदेव निर्विकारस्य नि
रस्तमोहादिविकारस्य तमः क्व तमसो भावे च तत्त्वरूपप्रकाशो वा क्व निरातंकस्य कार्य्या
दिनयस्तेन्यस्य ताने क्व च कुत्रैयेर्थः ॥ अनुरागादिशून्यत्वाच्च किंचन किमपि ग्रहणादि
कर्मा तापपिच्चेच नेकुत्रापीत्यर्थः ॥ ७८ ॥ ज्ञानीत्वनिर्वाच्यस्वभाव इत्याह ॥ क्व धैर्यमिति ॥ अ
योगिनः ज्ञानिनः एतदेव निःस्वभावस्य अत एवानिर्वाच्यस्वभावस्य धैर्यं क्व विवेकित्वं च

क्व तमः क्व प्रकाशो वा हानं क्व च न किंचन ॥ निर्विकारस्य धीरस्य निरातंकस्य सर्वदा ॥ ७८ ॥
क्व धैर्यं क्व विवेकित्वं क्व निरातंकतापि वा ॥ अनिर्वाच्यस्वभावस्य निःस्वभावस्य योगिनः ॥ ७९ ॥
न स्वर्गो नैव नरको जीवन्मुक्तिर्न चैव हि ॥ बहुनात्र किमुक्तेन योगदृष्ट्या न किंचन ॥ ८० ॥
नैव प्रार्थयते लाभं नालाभेनानुशोचति ॥ धीरस्य शीतलं चित्तममृतेनैव पूरितं ॥ ८१ ॥

क्व निरातंकतानिर्भयतापि क्वेत्यर्थः ॥ ७९ ॥ ज्ञानदृष्ट्यातु स्वर्गनरकमोक्षादिकं किंचिदपि ना
स्तीत्याह ॥ न स्वर्ग इति ॥ सुगमः श्लोकः ॥ ८० ॥ ज्ञानिनश्चित्तं तु प्रार्थनानुतापादिविकाररहि
तत्वादमृतेनैव परमानंदेनैव पूरितमित्याह ॥ नैवेति ॥ लाभं न प्रार्थयते अलाभेन स्वर्णाद्य
लाभेन नानुशोचति ॥ एतदेव धीरस्य चित्तं अमृतेनैव परमानंदेनैव पूरितं सत् शी
तलं त्रयाध्यात्मिकादितापरहितमित्यर्थः ॥ ८१ ॥ उक्तप्रायमेवार्थं पुनः पुनः भंगीविशेषेण
वर्णयति ज्ञानीदशायाः सर्वोत्कृष्टत्वख्यापनाय ॥ न शांतमिति ॥ ८२

निःकामो विद्याकामकर्महीनो ज्ञानी शांतं शांत्यादिसत्वगुणयुक्तं न स्तौति। नापि दुष्टं निंदति। तृप्तः सन् समदुःखसुखो भवन्निति निःकामत्वात् किंचित्कृत्यं न पश्यति॥ ८२॥ धीर इति। धीरो ज्ञानी संसारं न द्वेष्टि संसारादर्शित्वात् द्वेषितानुसंधानाद्यात्तथात्मानं न दिदृक्षति। एवमनुसंधानकारित्वान्न तत एव हर्षामर्षविनिर्मुक्तस्तथा जीवनमरणादिरहितः सदेकरूपत्वादित्यर्थः॥ ८३॥ निः

स्नेह इति॥ निराशो बुधः शोभते दीप्यते कीदृशः पुत्रदारादौ निःस्नेहः प्रीतिरहितः विषयेषु निःकामः भोगेच्छारहितः स्वशरीरेपि भोजनादिचिंतारहितः॥ ८४॥०॥

न शांतं स्तौति निःकामो न दुष्टमपि निंदति॥ समदुःखसुखस्तृप्तः किंचित्कृत्यं न पश्यति॥ ८२॥
धीरो न द्वेष्टि संसारमात्मानं न दिदृक्षति॥ हर्षामर्षविनिर्मुक्तो न मृतो न च जीवति॥ ८३॥
निःस्नेहः पुत्रदारादौ निःकामो विषयेषु च। निश्चिंतः स्वशरीरेपि निराशः शोभते बुधः॥ ८४॥
तुष्टिः सर्वत्र धीरस्य यथापतितवर्तिनः॥ स्वच्छंदं चरतो देशान् यत्रास्तमितशायिनः॥ ८५॥
पततूदेतु वा देहो नास्य चिंता महात्मनः॥ स्वभावभूमिविश्रांतिविस्मृताशेषसंसृतेः॥ ८६॥

तुष्टिरिति॥०॥ धीरस्य ज्ञानिनः यथापतितेन यथाप्राप्तेन वर्तनेनवर्तितुं शीलं यस्य यथापतितवर्तिनः सर्वत्र प्रारब्धप्राप्ते सुखदुःखादौ तुष्टिः विचारात्मलाभेनैव चरतस्तथा स्वच्छंदं स्वेच्छया नदीतीरप्रारब्धवशान्नानादेशान् विचरतः यत्र वने वा नगरे वा सूर्यो स्तमितस्तत्रैव शायिनः शयनं कुर्वतः॥ ८५॥ पततु इति॥ देहः पततु म्रियतां वा पृथग्वा उदेतु जीवतु उभयथापि अस्य ज्ञानिनश्चिंता न भवति। कीदृशस्य स्वभावो नाम निजात्मस्वरूपं स एव भूमिस्तत्र विश्रांत्या विस्मृता

अ०ष्टा०
४३

अकिंचन इति॥ केवलोऽस्मि विकारो बुद्धो रमते कीदृशः। अकिंचनः नास्ति किंचित्परिग्रहो यस्य स
अकिंचनः। अत एव कामचारः विधिनिषेधाद्यकिंकरः स्वच्छन्दचारी। अत एव निर्द्वन्द्वः सुखदुःखा
दिद्वन्द्वरहितः छिन्नसंशयः छेदितसंशयः शून्यः सर्वेषु विषयेषु प्रसक्तः सम्यक्सक्तः॥७९॥ निर्मम इति॥ धी
रस्तान्नी दीप्यते शोभते॥ यतो न ममः। अत एव समलोष्टाश्मकांचनः ज्ञानबलेन सुभिन्नो हृदय
ग्रन्थिरेव कारो यस्य सः तथा विनिर्धूते रजस्तमसी यस्य सः॥८०॥ सर्वत्रेति॥ सर्वत्र सर्वेषु विषये
षु अनवधानस्य तस्य तथा न किंचिद्वासना हृदि मुक्तात्मनः कर्तृत्वाद्यध्यासर

अकिंचनः कामचारो निर्द्वन्द्वश्छिन्नसंशयः॥ असक्तः सर्वभावेषु केवलो रमते बुधः॥७९॥
निर्ममः शोभते धीरः समलोष्टाश्मकांचनः॥ सुभिन्नहृदयग्रन्थिर्विनिर्धूतरजस्तमः॥८०॥
सर्वत्रानवधानस्य न किंचिद्वासना हृदि॥ मुक्तात्मनो वितृप्तस्य तुलना केन जायते॥८१॥
जानन्नपि न जानाति पश्यन्नपि न पश्यति॥ ब्रुवन्नपि च ब्रूते कोऽन्यो निर्वासनादृते॥८२॥
भिक्षुर्वा भूपतिर्वापि यो निःकामः स शोभते॥ भावेषु गलिता यस्य शोभनाशोभना मतिः॥८३॥

हितात्मनः। अत एवात्मानन्दे न विमेषतस्तस्य तुलना केन जायते ज्ञानीव्यतिरिक्तस्य ईदृशस्य
भावात् इत्यर्थः॥८१॥ अतुलनामेव विशेषेण विशदयति॥ जानन्निति॥ निर्वासनात् ज्ञानिनः अ
न्यः कोऽलोकदृष्ट्या मनसा जानन्नपि वस्तु नो जानाति तथा चक्षुषा पश्यन्नपि वस्तु तो न पश्यति ब्रु
वन्नपि न च ब्रूते कर्तृत्वाभिमानाभावादित्यर्थः॥८२॥ भिक्षुरिति॥ यस्य ज्ञानिनः तुच्छेषु भावेषु
शोभना अपकर्षेषु अशोभनत्वादिगता निर्गलिता अत एव यो निःकामः स भूपतिर्वा जनकादिव

४३

८५

क्व इति ॥ योगिनः निर्व्याजं निःकपटं यदार्जवं ऋजुबुद्धिस्तद्रूपस्य आत्मनिष्ठत्वाच्चरितार्थस्य कृतार्थ-
स्य स्वाच्छन्द्यं स्वेच्छाचारित्वं तथा संकोचश्च प्रवृत्त्यादिसंचरणं क्व तत्त्वविनिश्चयः क्व कर्तृत्वे वा क्व क-
र्त्रध्यासाभावान्नापतति निर्व्याजं यदार्जवं वक्रबुद्ध्याभावास्तद्रूपस्य ॥८२॥ आत्मेति ॥ आत्मनि वि-
श्रान्त्या स्थित्या तृप्तेन कृतार्थेन आशारहितेन अन्तर्गतार्तिना गतदुःखेन ज्ञानिना यदन्तःकरणेनानुभूयते तत्
कथं कं प्रकारं धर्ममाश्रित्य कथ्यते प्रकारस्यैव धर्मस्याभावात् कस्य वा प्रष्टुः अधिकारिणः कथ्यते नाऽनुग्रा-
ह्याधिकारिणोऽभावात् ॥८३॥

क्व स्वाच्छन्द्यं क्व संकोचः क्व वा तत्त्वविनिश्चयः ॥ निर्व्याजार्जवभूतस्य चरितार्थस्य योगिनः ॥८२॥
आत्मविश्रान्तितृप्तेन निराशेन गतार्तिना ॥ अन्तर्यदनुभूयेत तत्कथं कस्य कथ्यते ॥८३॥
सुप्तोऽपि न सुषुप्तौ च स्वप्नेऽपि शयितो न च ॥ जागरेऽपि न जागर्ति धीरस्तृप्तः पदे पदे ॥८४॥
ज्ञः सचिन्तोऽपि निश्चिन्तः सेन्द्रियोऽपि निरिन्द्रियः ॥ सुबुद्धिरपि निर्बुद्धिः साहंकारोऽनहंकृतिः ॥८५॥
न सुखी न च वा दुःखी न विरक्तो न रागवान् ॥ न मुमुक्षुर्न वा मुक्तो न किंचिन्न च किंचनः ॥८६॥

सुप्त इति ॥ धीरः सुषुप्तेन सुप्तः स्वप्नेऽपि शयितो न च जागरेऽपि न जागर्ति एवमवस्थात्रयीया बुद्धिस्तत्
विविक्तात्मज्ञानत्वात् इदमेवाभिप्रेत्याह ॥ पदे पदे सर्वतोऽपि विरतं नित्यानंदानुभवतृप्तः ॥८४॥
ज्ञ इति ॥ यो ज्ञानी लोकदृष्ट्या चिन्तादिसहितोऽपि वस्तुतस्तद्रहितः विविक्तात्मदर्शित्वात् ॥८५॥
न सुखीति ॥ लोकगत्या सुखीत्यादिरूपोऽपि वस्तुतस्तद्रहितः अन्तःकरणाध्यासरहितत्वात् न वि-
रक्तोऽपि रागद्वेषाभावात् न वा मुक्तः पूर्वमपि बन्धाभावात् तथा च किंचनः सदैकरूपत्वात् तथा कि-
चिदपि न स्वरूपनिर्वाच्यत्वात् ॥८६॥ ७०

विदेपेवीति॥ धन्योऽत्तानां लोकदृष्ट्या विदेहेऽपि वस्तुतो न विद्विष्टः स्वप्रकाशात्मानुभावात् । लोक-
दृष्ट्या समाधौ प्रतीयमानेऽपि न समाधिमान् समाधिकर्तृत्वाध्यासाभावात् । लोकदृष्ट्या जाड्ये प्रती-
यमानेऽपि न जाड्यः स्वानुभवशालित्वात् । लोकदृष्ट्या पांडित्ये प्रतीयमानेऽपि न पंडितोऽस्मि त्वभिमा-
नाभावात् ॥९७॥ मुक्त इति ॥ मुक्तः प्रारब्धवशाद्यथाप्राप्तस्थितौ स्वस्थः स्वात्मन्येव स्थितः तथा
कृतपूर्वकृते कर्तव्ये च कार्याभावात् लोककर्मातीतो निर्वृतः संतुष्टः समाभिमानिवेशो ह्यसन्न्यासः

विदेहेऽपि न विद्विष्टः समाधौ न समाधिमान् । जाड्येऽपि न जडो धन्यः पांडित्येऽपि न पंडितः ॥९७॥
मुक्तो यथास्थितिस्वस्थः कृतकर्तव्यनिर्वृतः । समः सर्वत्र वैतृष्ण्यान्न स्मरत्यकृतं कृतं ॥९८॥
न प्रीयते वंद्यमानो निंद्यमानो न कुप्यति । नैवोद्विजति मरणे जीवने नाभिनंदति ॥९९॥
न धावति जनाकीर्णं नारण्यमुपशांतधीः । यथातथा यत्रतत्र सम एवावतिष्ठते ॥१००॥
इति श्रीअष्टावक्रसत्तकं संपूर्णं । शुभमस्तु ॥ ॥१८॥

॥ एवं च सर्वत्र समः वैतृष्ण्यात् इदमकृतं इदं च कृतं इति न स्मरति ॥९८॥ न प्रीयत इति ॥ वैशिष्ट्यस्मि-
न्वंद्यमानो न तुष्यति निंद्यमानो न कुप्यति मरणे उपस्थिते सति उद्वेगं न प्राप्नोति किंतु मनो निश्चल-
त्वसंधानात् । तथा जीवने सति नाभिनंदति न तुष्यति ॥९९॥ न धावतीति ॥ उपशांतधीः पुरुषः
जनाकीर्णं प्रदेशं नानुधावति नारण्यं सर्वत्र शांतत्वात् । यथातथा भजनसंमर्दे ग्रामादौ समर्दग्रवा-
रण्ये वा यत्र तत्र च नेवायत्र नेवा सम एव स्वस्थचित्तः एवावतिष्ठते प्राणाप्तसमसाक्ष्यात्कारत्वात् ॥१००॥
इति श्रीमद्विश्वेश्वरविरचितायां अष्टावक्रटीकायां शांतिशतकं संपूर्णं ॥ १८॥

साध्यसाधनरूपेणात्तानेतानेगुरोर्मुखात्॥ सिद्धस्यात्मनि विश्रांतिमनु[illegible]स्यभिप्रायः तस्य सूचकं॥ २॥
एवं तत्वज्ञानिनः स्वभावभूतां शांतिं श्रुत्वा स्वकृतार्थतया गुरूं परितोषयितुं मन्मम विश्रांत्युपकारकं शिष्यः स्वयमाह॥ तत्वेति॥ हे गुरो मया भवतः सकाशात् तत्वविज्ञानोपदेशं मादाय स्वहृदयोदरात् नानाविधपरामर्शस्य शल्यस्योद्धारः कृतः॥ १॥ तदेव स्पष्टयति॥ क्वधर्म इति॥
धर्मार्थकामाः अपि हृदयोदरात् निरस्ताः कृषिप्रमुखादित्यर्थः॥ स्वमहिम्नि स्थितस्य मे मम विवेकिता क्व द्वैतं च क्व द्वैतं च क्व चिन्मात्रविश्रांतस्य विवेकानुपयोगात्॥

तत्वविज्ञानसंदेशमादाय हृदयोदरात्॥ नानाविधपरामर्शशल्योद्धारः कृतो मया॥ १॥
क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता॥ क्व द्वैतं क्व च वाद्वैतं स्वमहिम्नि स्थितस्य मे॥ २॥
क्व भूतं क्व भविष्यं च वर्तमानमपि क्व च॥ क्व देशः क्व च वा नित्यं स्वमहिम्नि स्थितस्य मे॥ ३॥
क्व चात्मा क्व च वानात्मा क्व शुभं क्वाशुभं तथा॥ क्व तुरीयमभयं वापि स्वमहिम्नि स्थितस्य मे॥ ४॥

उत्तीर्णत्पपरपारेनौकाया: किं प्रयोजनमिति न्यायात् द्वैतस्य च ज्ञानबाधितत्वात् अद्वैती पि विशेषपदत्वेनाश्नाविकल्पात् विवेकाद्योपि मम न सन्तीत्यर्थः॥ २॥ क्व धेनमित्युक्तमेव विशेषं प्रपंचयति॥ क्व भूतमिति॥ कालस्यापि ममास्पूर्तेस्तदुपाधिः भूतभविष्यवर्तमानाः प्रपंचयति॥ २॥ पनतीव्याप्तेतीति पि न संतीत्यर्थः नित्यं स्वमहिम्नि स्थितस्य मम देशोपि नास्तीत्यर्थः॥ ३॥
त्मा स च व्याप्यमपेक्ष्यते॥ स्वमहिम्नि स्थितस्य मम आत्मादिकं नास्तीत्यर्थः॥ ४॥

गुरुभ्या०
८५

क्व स्वप्न इति॥ स्वप्नादयो बुद्धेरेवावस्थास्ता मम न संति। एतेन त्रितयाभावेन त्रिस्पष्टतुरीयावस्थापि मम नास्ति। तथा भयादयोप्यंतःकरणधर्मा मम न संतीत्यर्थः॥ ५॥ क्व दूरमिति॥ सर्वस्य परिपूर्णस्य मम दूरसमीपादिकं नास्ति॥ पूर्णदर्शिनो मम स्थूलसूक्ष्मादिरपि नास्तीत्यर्थः॥ ६॥

क्व स्वप्नः क्व सुषुप्तिर्वा क्व च जागरणं तथा। क्व तुरीयं भयं वापि स्वमहिम्नि स्थितस्य मे॥ ५॥
क्व दूरं क्व समीपं वा बाह्यं क्वाभ्यंतरं क्व वा। क्व स्थूलं क्व च वा सूक्ष्मं स्वमहिम्नि स्थितस्य मे॥ ६॥
क्व मृत्युर्जीवितं क्व वा क्व लोकाः क्वास्य लौकिकं। क्व लयः क्व समाधिर्वा स्वमहिम्नि स्थितस्य मे॥ ७॥ अलं त्रिवर्गकथया योगस्य कथयाप्यलं॥ अलं विज्ञानकथया विश्रांतस्य ममात्मनि॥ ८॥ इति श्रीमदात्मविश्रांत्यष्टकं संपूर्णं॥ १९॥

क्व मृत्युरिति॥ कालत्रयेसद्रूपस्य मम जीवितं मरणं न स्तः। पूर्णमात्रदर्शिनो मम लोकाद्यो न संति। लौकिकं कार्यमपि नास्ति। पूर्णस्य मम लयः क्व समाधिश्च॥ ७॥ अलमिति॥ धर्मार्थकामकथया योगाभ्यासकथया विज्ञानकथया चालं। आत्मविश्रांतस्य मम ताभिः प्रयोजनाभावादित्यर्थः॥ ८॥ इति श्रीमहेश्वरविरचितायां गुरुवक्त्रटीकायामात्मविश्रांत्यष्टकं समाप्तं॥ १९॥ ८५

(89)

(२६)

आत्मविश्रान्त्यविश्रान्त्यमितिव्यक्तां मुक्तिं प्रशस्तिनं॥ जीवन्मुक्तिदशां शिष्यश्चानुदर्शाभिरप्रवीत॥१॥
श्रुत्वात्मविश्रान्तेः फलभूतां विदुषः स्वभावभूतां जीवन्मुक्तदशां शिष्यश्चानुदर्शश्लोकैर्निरूपयति
क्व भूतान्नीति॥ निरंजने सर्वोपाधीभूते स्वस्मात्मत्स्वरूपे भूतदेहेन्द्रियमनांसि क्व॥ नहि किं शून्यमस्ति
नैराश्यं क्व शून्यमिति॥ नहि सदात्मनि सत्त्वि... संबन्धीत्यर्थः॥ मयि नैराश्य... स्वभाविके
नैराश्यं निरूप्यत्वादित्यर्थः॥१॥ क्वेति॥ सर्वोगतद्वन्द्वस्य मम शास्त्रं क्व तज्जन्यं विज्ञानं क्व॥

क्व भूतानि क्व देहो वा क्वेन्द्रियाणि क्व वा मनः॥ क्व शून्यं क्व च नैराश्यं मत्स्वरूपे निरंजने॥१॥
क्व शास्त्रं क्वात्मविज्ञानं क्व वा निर्विषयं मनः॥ क्व तृप्तिः क्व वितृष्णत्वं गतद्वन्द्वस्य मे सदा॥२॥
क्व विद्या क्व च वाविद्या क्वाहं क्वेदं मम क्व वा॥ क्व परोक्षं फलं वा क्व निःस्वभावस्य मे सदा॥३॥

आत्मविश्रान्त्या सर्वस्य गलितप्रायत्वात् निर्विषयं मनोपि न तस्यापि गलितप्राय
त्वात्॥ तृप्तावच तृप्तिरपि न तथा तृप्तिसाध्यं वितृष्णत्वमपि न चीनस्मैव गलित
प्रायत्वादित्यर्थः॥२॥ क्वेति॥ मयि क्व विद्यादिहंकारधर्माः इदं बाह्यं वस्तुजातं क्व म
म संबन्धः क्व द्वितीयस्य संबन्धिनो भावात् तथा बन्धमोक्षावपि धर्मौ क्व ... स्व
रूपस्येति॥ निर्विशेषवस्तुरूपस्य मम रूपिता धर्मगार्त्वं तथाच निर्धर्मकमपि न विद्यते॥

क्व प्रारब्धेति॥ प्रारब्धानि कर्माणि तथा जीवन्मुक्तिस्तथा विदेहकैवल्यमेते धर्माः सदा निर्विशे-
षस्य मे न सन्तीत्यर्थः॥५॥ क्व कर्त्तेति॥ सदा निःस्वभावस्य मे कर्तृत्वभोक्तृत्वनिःक्रियस्फुरणा-
नि क्वापरोक्षं च तिरूपं च तज्ज्ञानं फलं विषयावच्छिन्नमपरोक्षं चैतन्यं क्वेत्यर्थः॥५॥६॥

क्व प्रारब्धानि कर्माणि जीवन्मुक्तिरपि क्व वा॥ क्व तद्विदेहकैवल्यं निर्विशेषस्य सर्वदा॥५॥
क्व कर्त्ता क्व च वा भोक्ता निःक्रियं स्फुरणं क्व वा॥ क्वापरोक्षं फलं वा क्व निःस्वभावस्य मे सदा॥६॥
क्व लोकाः क्व मुमुक्षुर्वा क्व योगी ज्ञानवान् क्व वा॥ क्व बद्धः क्व च वा मुक्तः स्वस्वरूपेऽहमद्वये॥७॥
क्व सृष्टिः क्व च संहारः क्व साध्यं क्व च साधनं॥ क्व साधकः क्व सिद्धिर्वा स्वस्वरूपेऽहमद्वये॥८॥

क्व लोका इति॥ अहमित्येवंरूपे द्वयोऽपरमद्वये आत्माद्वैते स्वस्वरूपे सति लोकाः क्व
मुमुक्षुर्वा योगी ज्ञानवान् क्व बद्धः मुक्तश्च क्वेत्यर्थः॥७॥ क्व सृष्टिरिति॥ अहमद्वये
आत्माद्वैते स्वस्वरूपे सति सृष्टिसंहारौ साध्यसाधने साधकसिद्धी क्वेति॥८॥

(८)

क्वप्रमातेति॥ सर्वदा विमलस्योपाधिसंबंधमलशून्यस्य मे प्रमाता प्रमाणं प्रमेयं प्रमा सं
बंधः। मम किंचित्सामान्यतोन्यत्पदार्थमात्रं क्व न किंचिदपि पदार्थमात्रेपि मम क्व संबंधोसं
बंधशून्यत्वादित्यर्थः॥ ९॥ क्व विक्षेप इति॥ सर्वदा निःक्रियस्य मे विक्षेपादिका क्रिया क्व इत्यर्थः।
॥ ८॥ एतः करणावच्छिन्नप्रमाता इंद्रियावच्छिन्नप्रमाणं। विषयावच्छिन्नप्रमेयं। ज्ञानावच्छिन्न
प्रमा॥ क्व चेष्टेति॥ सदा निर्विमर्शस्य विशेषज्ञानवृत्तिशून्यस्य व्यवहारः व्यवहारि क्व

क्व प्रमाता प्रमाणं वा क्व प्रमेयं क्व च प्रमा॥ क्व किंचित्क्व न किंचिद्वा सर्वदा विमलस्य मे॥ ८॥
क्व विक्षेपः क्व चैकाग्र्यं क्व निर्बोधः क्व मूढता॥ क्व हर्षः क्व विषादो वा सर्वदा निःक्रियस्य मे॥ ९॥
क्व चैष व्यवहारो वा क्व च सा परमार्थता॥ क्व सुखं क्व च वा दुःखं निर्विमर्शस्य मे सदा॥ १०॥
क्व माया क्व च संसारः क्व प्रीतिर्विरतिः क्व वा॥ क्व जीवः क्व च तद्ब्रह्म सर्वदा विमलस्य मे॥ ११॥
क्व प्रवृत्तिर्निवृत्तिर्वा क्व मुक्तिः क्व च बंधनं॥ कूटस्थनिर्विभागस्य स्वस्थस्य मम सर्वदा॥ १२॥

पदार्थज्ञानेन कपरमार्थताज्ञानेन वा क्व सुखादिकमपि क्व॥ १०॥ क्व मायेति॥ सर्वदा विमल
स्योपाधिमलशून्यस्य मम माया संसारो प्रीतिर्विरतिश्च वैराग्यं क्व जीवभावो ब्रह्मभावश्च
क्वोपाध्यभावे जीवत्वस्य वक्तुमशक्यत्वाद्व्याप्यव्यापकत्वाभावे ब्रह्मत्वस्य वक्तु
मशक्यत्वादित्यर्थः॥ ११॥ कूटस्थनिःक्रियस्य तथा निर्विभागस्य भेदरहितस्य सर्वदा
स्वस्थस्य मम प्रवृत्तिः निवृत्तिः क्व मुक्तिः बंधनं च क्व इत्यर्थः॥ १२॥ ०॥

92

जी०मु०
९

क्वोपदेश इति ॥ निरुपाधेरुपाधिसम्बन्धस्य तथा शिवस्य नित्यानन्दस्वरूपस्य उपदेशः क्रिया
कउपदेशकं शास्त्रं च क्व मायादि उपाध्यभावे तत्त्वतोपदेशस्य चाभावात् ॥ सुतरां वा शि
ष्यश्च गुरुश्च क्व स्वयं शिवरूपस्य च पुरुषार्थो वा क्व चास्ति ॥ १३ ॥ जीवन्मुक्तो दशामुप
संहरति ॥ क्व चास्तीति ॥ न क्वास्तीति न स्फुरति ॥ सत्यापेक्षत्वात् असत्त्वस्य तथा नस्तीप

क्वोपदेशः क्व वा शास्त्रं क्व शिष्यः क्व च वा गुरुः ॥ क्व चास्ति पुरुषार्थो वा निरुपाधेः शि
वस्य मे ॥ १३ ॥ क्व चास्ति क्व च वा नास्ति क्वास्ति चैकं क्व च द्वयं ॥ बहुनात्र किमुक्तेन कि
ञ्चिन्नोत्तिष्ठते मम ॥ १४ ॥ इति श्रीशिष्यप्रोक्तं जीवन्मुक्तचतुर्दशकं ॥ २० ॥

पि न स्फुरति ॥ सत्यापेक्षत्वान्नास्तित्वस्य कल्पितत्वाच्च मिथः सापेक्षत्वादेकत्वादि चेतपि मम न
त्तः प्रत्येकं व्याप्तिं न द्वैतनिषेधस्य कस्यचित् कोऽपि निरपि वक्तुमशक्यत्वात् [illegible] ॥ ०
बहुनेति ॥ बहुनात्र उक्तेन किं प्रयोजनं नः मम चिदेकरूपस्य किञ्चिदपि नोत्तिष्ठते न प्रकाशते
इत्यर्थः ॥ १४ ॥ इति श्रीविश्वेश्वरविरचितायां [illegible]टीकायां शिष्यप्रोक्तजीवन्मुक्तच
तुर्दशके समाप्तम् ॥ २० ॥

विनयबुद्धिसोकार्यमुद्दिश्य ग्रंथकृत्स्वयं श्लोकसंख्या पुरस्कृत्य प्राहानुक्रमणी
स्फुटं ॥१॥ दशषट्च्चोद्दश श्लोकाः॥ गुरुणा उपदेशे स्युः सन्ति प्रथम प्रकरणे पंचवि
संतिः श्लोकाः शिष्याक्तानुभवोल्लासे द्वितीय प्रकरणे स्युः चतुर्दश श्लोकाः पुनर्गुरुणा
दैपम्प्रयोक्तोपदेशाख्ये तृतीय प्रकरणे स्युः ॥१॥

दशषट्चोपदेशे स्युः श्लोकाश्च पंचविंसतिः॥
स्त्यात्मानुभावोल्लासे उपदेशे चतुर्दशः॥ १॥
षट्त्रिंशतेलये चैव उपदेशे चतुश्च तुः॥ पंचकं
स्यादनुभावे वैधमोहे च चतुष्कं॥ २॥०

षट् श्लोकाः शिष्योक्तानुभावोल्लासे चतुर्थ प्रकरणे स्युः॥ चत्वारः श्लोका गुरुप्रो
क्तोल्लयाख्ये पंचमे प्रकरणे स्युः। पुनश्चत्वारः श्लोकाः गुरुप्रोक्ते प्रतिवादिसिद्ध
नयनिबोधोपदेशाख्ये षष्ठे प्रकरणे स्युः॥ श्लोकानां पंचकं शिष्यप्रोक्तेनुभावाख्ये
सप्तमे प्रकरणे स्युः। श्लोकानां चतुष्कं गुरुप्रोक्ते वैधमोहाख्ये अष्टमे प्रकरणे स्यात् ॥२॥

स्वप्र० ४८

निर्वेदोपसमइति॥ श्लोकाष्टकं गुरुप्रोक्तं निर्वेदाख्येन नवमे प्रकरणे स्यात्॥ गुरुप्रोक्तमुपशमाष्टकं नाम दशकं प्रकरणं॥ गुरुप्रोक्तं ज्ञानाष्टकं नाम एकादशप्रकरणं॥ शिष्यप्रोक्तं एवाष्टकं नाम द्वादशप्रकरणं॥ शिष्यप्रोक्तं यथासुखसप्तकं नाम त्रयोदशं प्रकरणं॥ शिष्यप्रोक्तं शांतिचतुष्कं नाम चतुर्दशं प्रकरणं॥३॥ तत्त्वोपदेश इति॥ विंशतिश्लोकाः गुरुप्रोक्ते तत्त्वोपदेशाख्ये पंचदशे प्रकरणे स्युः॥ दशश्लोकाः गुरुप्रोक्ते विशेषोपदेशाख्ये षोडशे प्रकरणे स्युः॥

निर्वेदोपसमो ज्ञानमेवमेवाष्टकं भवेत्॥ यथासुखं सप्तकं च शांतो स्याद्वेदसंमतिः॥३॥
तत्त्वोपदेशो विंशच्च दशज्ञानोपदेशकौ॥ तत्त्वस्वरूपविश्रंशशमे च शतकं भवेत्॥४॥
अष्टकं चात्मविश्रांतौ जीवन्मुक्तौ चतुर्दश॥ षट्संख्याक्रमविज्ञाने ग्रंथैकात्म्यमतः परं॥५॥

विंशतिश्लोकाः गुरुप्रोक्तास्तत्त्वस्वरूपोपदेशाख्ये सप्तदशे प्रकरणे स्युः॥ गुरुप्रोक्तं शमशतकं नाम अष्टादशं प्रकरणं॥४॥ अष्टकं चेति शिष्यप्रोक्तमात्मविश्रांत्याख्यमष्टकं नाम एकोनविंशतिप्रकरणं॥ शिष्यप्रोक्तं जीवन्मुक्तिचतुर्दशकं नाम विंशतितमं प्रकरणं॥ गुरुप्रोक्तं संख्याक्रमकथनं नाम एकविंशतिप्रकरणं॥ अतः परं विंशत्येकमितैः षड्श्लोकैः ग्रंथैकात्म्यं संख्याग्रंथस्वरूपं चैवैकात्म्यं समूहरूपतया एकात्मत्वमित्यर्थः॥५॥०॥ ४८

पशत्येक इति॥ इति गूढार्थावक्रसंख्याक्रमं विंशत्येकाकियद्भिः खंडैः विंशत्येकमितैः (त्)
कविंशतिखंडैरित्यर्थः॥ कियद्भिः श्लोकैः रात्मा त्रिमध्यखः जीवात्मपरमात्मभेदभिन्न
आत्मा दोज्ञात्रिस्त्रयः मध्यखं च मध्ये शून्यं एकानां वामतो गतिरिति न्यायात् त्रंते द्वौ म
ध्यख मा दो त्रयः॥३०२॥

विंसत्येकं तितैः खंडैः श्लोकै रात्मा त्रिमध्यखैः॥
एवं भूतानुभूतेश्च श्लोकाः संख्याक्रमागमी॥६॥
इति गूढार्थावक्रसमाप्तं॥०॥

वा विवेकैः त्रिशतैः श्लोकैरित्यर्थः॥ श्लोकसंख्यामुपसंहरति॥ एवं भूतानुभूतिरूपोयं ग्रंथ
स्तस्य संख्याक्रमो विद्यते येषु ते संख्याक्रमा इदृशाः श्लोका आगमी कथिता इत्यर्थः॥६॥०॥
इति श्रीमद्विश्वेश्वरविरचितायां गूढार्थावक्ररीकायां संख्याक्रमादिव्याख्यानं समाप्तं॥ संवत्
१८८५ माघ कृष्ण पक्षे पंचम्यां समाप्तं॥ संवत् १७१९ की पोथी थी ते पे तीस्यो है ६५.....

श्री सांब
नमः
९८

५ हारेन पाणिन च कंकणेन जलेन कांतिन च चंदनेन॥ स्नानेन मुक्तिन च मुंडनेन

मान्ये न तृप्तिन च भोजनेन॥ ९॥ ग्रंथः शुक्रो भार्गवो विधिरपि मलिनो मार्कंडे

य वो गोप्य जातिः वेश्या पुत्रो वसिष्ठः सुरयम पतिः सर्व भक्षो हुताशनः॥ व्या

सो मत्स्योदरीय लवण जलनिधि पांडवो जारजाता रुद्रो भस्मांग धारी मम कुल

श्रेणी दंदुले नैव दोषः १

...थ समाप्तं॥ शुभं भवतु॥

97

[OrderDescription]
,CREATED=29.09.20 12:23
,TRANSFERRED=2020/09/29 at 12:37:06
,PAGES=97
,TYPE=STD
,NAME=S0003758
,Book Name=M-997-ASHTAVKRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF

FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF

FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,